युत्सीष्ट	युत्सीयास्ताम्	०	आ० लिङ्	जनिषीष्ट	जनिषीयास्ताम्	०
अयोत्स्यत	अयोत्स्येताम्	०	लृङ्	अजनिष्यत	अजनिष्येताम्	०
	लिट्				लिट्	
युयुधे	युयुधाते	युयुधिरे	प्र०	जज्ञे	जज्ञाते	जज्ञिरे
युयुधिषे	युयुधाथे	युयुधिध्वे	म०	जज्ञिषे	जज्ञाथे	जज्ञिध्वे
युयुधे	युयुधिवहे	युयुधिमहे	उ०	जज्ञे	जज्ञिवहे	जज्ञिमहे
	लुङ् (४)				लुङ् (५)	
अयुद्ध	अयुत्साताम्	अयुत्सत	प्र०	अजनि, अजनिष्ट	अजनिषाताम्	अजनिषत
अयुद्धाः	अयुत्साथाम्	अयुद्ध्वम्	म०	अजनिष्ठाः	अजनिषाथाम्	अजनिध्वम्
अयुत्सि	अयुत्स्वहि	अयुत्स्महि	उ०	अजनिषि	अजनिष्वहि	अजनिष्महि

सूचना—लट् आदि में जन् को जा हो जाता है।

(५) स्वादिगण (उभयपदी धातु)

(४६) सु (स्नान करना या कराना, रस निकालना) (देखो अ० ४७)

परस्मैपद	लट्			आत्मनेपद	लट्	
सुनोति	सुनुतः	सुन्वन्ति	प्र०	सुनुते	सुन्वाते	सुन्वते
सुनोषि	सुनुथः	सुनुथ	म०	सुनुषे	सुन्वाथे	सुनुध्वे
सुनोमि	सुनुवः, सुन्वः	सुनुमः, सुन्मः	उ०	सुन्वे	सुनुवहे, सुन्वहे	सुनुमहे, सुन्महे
	लोट्				लोट्	
सुनोतु	सुनुताम्	सुन्वन्तु	प्र०	सुनुताम्	सुन्वाताम्	सुन्वताम्
सुनु	सुनुतम्	सुनुत	म०	सुनुष्व	सुन्वाथाम्	सुनुध्वम्
सुनवानि	सुनवाव	सुनवाम	उ०	सुनवै	सुनवावहै	सुनवामहै
	लङ्				लङ्	
असुनोत्	असुनुताम्	असुन्वन्	प्र०	असुनुत	असुन्वाताम्	असुन्वत
असुनोः	असुनुतम्	असुनुत	म०	असुनुथाः	असुन्वाथाम्	असुनुध्वम्
असुनवम्	असुनुव	असुनुम	उ०	असुन्वि	असुनुवहि, असुन्वहि	असुनुमहि, असुन्महि
	विधिलिङ्				विधिलिङ्	
सुनुयात्	सुनुयाताम्	सुनुयुः	प्र०	सुन्वीत	सुन्वीयाताम्	सुन्वीरन्
सुनुयाः	सुनुयातम्	सुनुयात	म०	सुन्वीथाः	सुन्वीयाथाम्	सुन्वीध्वम्
सुनुयाम्	सुनुयाव	सुनुयाम	उ०	सुन्वीय	सुन्वीवहि	सुन्वीमहि
सोष्यति	सोष्यतः	सोष्यन्ति	लृट्	सोष्यते	सोष्येते	सोष्यन्ते
सोता	सोतारौ	सोतारः	लुट्	सोता	सोतारौ	सोतारः
सूयात्	सूयास्ताम्	सूयासुः	आ० लिङ्	सोषीष्ट	सोषीयास्ताम्	सोषीरन्
असोष्यत्	असोष्यताम्	असोष्यन्	लृङ्	असोष्यत	असोष्येताम्	असोष्यन्त
	लिट्				लिट्	
सुषाव	सुषुवतुः	सुषुवुः	प्र०	सुषुवे	सुषुवाते	सुषुविरे
सुषविथ, सुषोथ	सुषुवथुः	सुषुव	म०	सुषुविषे	सुषुवाथे	सुषुविध्वे
सुषाव, सुषव	सुषुविव	सुषुविम	उ०	सुषुवे	सुषुविवहे	सुषुविमहे
	लुङ् (५)				लुङ् (४)	
असावीत्	असाविष्टाम्	असाविषुः	प्र०	असोष्ट	असोषाताम्	असोषत
असावीः	असाविष्टम्	असाविष्ट	म०	असोष्ठाः	असोषाथाम्	असोढ्वम्
असाविषम्	असाविष्व	असाविष्म	उ०	असोषि	असोष्वहि	असोष्महि

परस्मैपदी धातुएँ

(४७) आप् (पाना) (देखो अ० ४८) (४८) शक् (सकना) (देखो अ० ४९)

	लट्				लट्	
आप्नोति	आप्नुतः	आप्नुवन्ति	प्र०	शक्नोति	शक्नुतः	शक्नुवन्ति
आप्नोषि	आप्नुथः	आप्नुथ	म०	शक्नोषि	शक्नुथः	शक्नुथ
आप्नोमि	आप्नुवः	आप्नुमः	उ०	शक्नोमि	शक्नुवः	शक्नुमः
	लोट्				लोट्	
आप्नोतु	आप्नुताम्	आप्नुवन्तु	प्र०	शक्नोतु	शक्नुताम्	शक्नुवन्तु
आप्नुहि	आप्नुतम्	आप्नुत	म०	शक्नुहि	शक्नुतम्	शक्नुत
आप्नवानि	आप्नवाव	आप्नवाम	उ०	शक्नवानि	शक्नवाव	शक्नवाम
	लङ्				लङ्	
आप्नोत्	आप्नुताम्	आप्नुवन्	प्र०	अशक्नोत्	अशक्नुताम्	अशक्नुवन्
आप्नोः	आप्नुतम्	आप्नुत	म०	अशक्नोः	अशक्नुतम्	अशक्नुत
आप्नवम्	आप्नुव	आप्नुम	उ०	अशक्नवम्	अशक्नुव	अशक्नुम
	विधिलिङ्				विधिलिङ्	
आप्नुयात्	आप्नुयाताम्	आप्नुयुः	प्र०	शक्नुयात्	शक्नुयाताम्	शक्नुयुः
आप्नुयाः	आप्नुयातम्	आप्नुयात	म०	शक्नुयाः	शक्नुयातम्	शक्नुयात
आप्नुयाम्	आप्नुयाव	आप्नुयाम	उ०	शक्नुयाम्	शक्नुयाव	शक्नुयाम

आप्स्यति	आप्स्यतः	आप्स्यन्ति	लृट्	शक्ष्यति	शक्ष्यतः	शक्ष्यन्ति
आप्ता	आप्तारौ	आप्तारः	लुट्	शक्ता	शक्तारौ	शक्तारः
आप्यात्	आप्यास्ताम्	आप्यासुः	आ० लिङ्	शक्यात्	शक्यास्ताम्	शक्यासुः
आप्स्यत्	आप्स्यताम्	आप्स्यन्	लृङ्	अशक्ष्यत्	अशक्ष्यताम्	अशक्ष्यन्
	लिट्				लिट्	
आप	आपतुः	आपुः	प्र०	शशाक	शेकतुः	शेकुः
आपिथ	आपथुः	आप	म०	शेकिथ, शशक्थ	शेकथुः	शेक
आप	आपिव	आपिम	उ०	शशाक, शशक	शेकिव	शेकिम
	लुङ् (२)				लुङ् (२)	
आपत्	आपताम्	आपन्	प्र०	अशकत्	अशकताम्	अशकन्
आपः	आपतम्	आपत	म०	अशकः	अशकतम्	अशकत
आपम्	आपाव	आपाम	उ०	अशकम्	अशकाव	अशकाम

(६) तुदादिगण

(परस्मैपदी धातुएँ)

(४९) तुद् (दुःख देना) (देखो अ० ५)

सूचना—तुद् उभयपदी है। यहाँ केवल परस्मैपद के रूप दिये हैं। आत्मने० में सेव् के तुल्य।

(५०) इष् (चाहना) (देखो अ० ५)

सूचना—लट्, लोट्, लङ्, विधिलिङ् में इष् को इच्छ् हो जाता है।

	लट्				लट्	
तुदति	तुदतः	तुदन्ति	प्र०	इच्छति	इच्छतः	इच्छन्ति
तुदसि	तुदथः	तुदथ	म०	इच्छसि	इच्छथः	इच्छथ
तुदामि	तुदावः	तुदामः	उ०	इच्छामि	इच्छावः	इच्छामः
	लोट्				लोट्	
तुदतु	तुदताम्	तुदन्तु	प्र०	इच्छतु	इच्छताम्	इच्छन्तु
तुद	तुदतम्	तुदत	म०	इच्छ	इच्छतम्	इच्छत
तुदानि	तुदाव	तुदाम	उ०	इच्छानि	इच्छाव	इच्छाम
	लङ्				लङ्	
अतुदत्	अतुदताम्	अतुदन्	प्र०	ऐच्छत्	ऐच्छताम्	ऐच्छन्
अतुदः	अतुदतम्	अतुदत	म०	ऐच्छः	ऐच्छतम्	ऐच्छत
अतुदम्	अतुदाव	अतुदाम	उ०	ऐच्छम्	ऐच्छाव	ऐच्छाम
	विधिलिङ्				विधिलिङ्	
तुदेत्	तुदेताम्	तुदेयुः	प्र०	इच्छेत्	इच्छेताम्	इच्छेयुः
तुदेः	तुदेतम्	तुदेत	म०	इच्छेः	इच्छेतम्	इच्छेत
तुदेयम्	तुदेव	तुदेम	उ०	इच्छेयम्	इच्छेव	इच्छेम

तोत्स्यति	तोत्स्यतः	तोत्स्यन्ति	लृट्	एषिष्यति	एषिष्यतः	एषिष्यन्ति
तोत्ता	तोत्तारौ	तोत्तारः	लुट्	(क) एषिता (ख) एष्टा (दोनों प्रकार से)		
तुद्यात्	तुद्यास्ताम्	तुद्यासुः	आ०लिङ्	इष्यात्	इष्यास्ताम्	इष्यासुः
अतोत्स्यत्	अतोत्स्यताम्	अतोत्स्यन्	लृङ्	ऐषिष्यत्	ऐषिष्यताम्	ऐषिष्यन्
	लिट्				लिट्	
तुतोद	तुतुदतुः	तुतुदुः	प्र०	इयेष	ईषतुः	ईषुः
तुतोदिथ	तुतुदथुः	तुतुद	म०	इयेषिथ	ईषथुः	ईष
तुतोद	तुतुदिव	तुतुदिम	उ०	इयेष	ईषिव	ईषिम
	लुङ् (४)				लुङ् (५)	
अतौत्सीत्	अतौत्ताम्	अतौत्सुः	प्र०	ऐषीत्	ऐषिष्टाम्	ऐषिषुः
अतौत्सीः	अतौत्तम्	अतौत्त	म०	ऐषीः	ऐषिष्टम्	ऐषिष्ट
अतौत्सम्	अतौत्स्व	अतौत्स्म	उ०	ऐषिषम्	ऐषिष्व	ऐषिष्म

(५१) स्पृश् (छूना) (देखो अ० ५)				(५२) प्रच्छ् (पूछना) (देखो अ० ५)		
	लट्				लट् (प्रच्छ् को पृच्छ्)	
स्पृशति	स्पृशतः	स्पृशन्ति	प्र०	पृच्छति	पृच्छतः	पृच्छन्ति
स्पृशसि	स्पृशथः	स्पृशथ	म०	पृच्छसि	पृच्छथः	पृच्छथ
स्पृशामि	स्पृशावः	स्पृशामः	उ०	पृच्छामि	पृच्छावः	पृच्छामः
	लोट्				लोट् (प्रच्छ् को पृच्छ्)	
स्पृशतु	स्पृशताम्	स्पृशन्तु	प्र०	पृच्छतु	पृच्छताम्	पृच्छन्तु
स्पृश	स्पृशतम्	स्पृशत	म०	पृच्छ	पृच्छतम्	पृच्छत
स्पृशानि	स्पृशाव	स्पृशाम	उ०	पृच्छानि	पृच्छाव	पृच्छाम
	लङ्				लङ् (प्रच्छ् को पृच्छ्)	
अस्पृशत्	अस्पृशताम्	अस्पृशन्	प्र०	अपृच्छत्	अपृच्छताम्	अपृच्छन्
अस्पृशः	अस्पृशतम्	अस्पृशत	म०	अपृच्छः	अपृच्छतम्	अपृच्छत
अस्पृशम्	अस्पृशाव	अस्पृशाम	उ०	अपृच्छम्	अपृच्छाव	अपृच्छाम
	विधिलिङ्				विधिलिङ् (प्रच्छ् को पृच्छ्)	
स्पृशेत्	स्पृशेताम्	स्पृशेयुः	प्र०	पृच्छेत्	पृच्छेताम्	पृच्छेयुः
स्पृशेः	स्पृशेतम्	स्पृशेत	म०	पृच्छेः	पृच्छेतम्	पृच्छेत
स्पृशेयम्	स्पृशेव	स्पृशेम	उ०	पृच्छेयम्	पृच्छेव	पृच्छेम

(क) स्पर्क्ष्यति (ख) स्प्रक्ष्यति (दोनों प्रकार से) लृट् प्रक्ष्यति प्रक्ष्यतः प्रक्ष्यन्ति
(क) स्पर्ष्टा (ख) स्प्रष्टा (,,) लुट् प्रष्टा प्रष्टारौ प्रष्टारः
स्पृश्यात् स्पृश्यास्ताम् स्पृश्यासुः आ० लिङ् पृच्छ्यात् पृच्छ्यास्ताम् पृच्छ्यासुः
(क) अस्पर्क्ष्यत् (ख) अस्प्रक्ष्यत् (दोनों प्रकार से) लृङ् अप्रक्ष्यत् अप्रक्ष्यताम् अप्रक्ष्यन्

	लि				लिट्	
पस्पर्श	पस्पृशतुः	पस्पृशुः	प्र०	पप्रच्छ	पप्रच्छतुः	पप्रच्छुः
पस्पर्शिथ	पस्पृशथुः	पस्पृश	म०	पप्रच्छिथ, पप्रष्ठ	पप्रच्छथुः	पप्रच्छ
पस्पर्श	पस्पृशिव	पस्पृशिम	उ०	पप्रच्छ	पप्रच्छिव	पप्रच्छिम
	लुङ् (क) (४)				लुङ् (४)	
अस्पार्क्षीत्	अस्पार्ष्टाम्	अस्पार्क्षुः	प्र०	अप्राक्षीत्	अप्राष्टाम्	अप्राक्षुः
अस्पार्क्षीः	अस्पार्ष्टम्	अस्पार्ष्ट	म०	अप्राक्षीः	अप्राष्टम्	अप्राष्ट
अस्पार्क्षम्	अस्पार्क्ष्व	अस्पार्क्ष्म	उ०	अप्राक्षम्	अप्राक्ष्व	अप्राक्ष्म

(ख)(४) अस्प्राक्षीत् अस्प्राष्टाम्० (पूर्ववत्)
(ग)(७) अस्पृक्षत् अस्पृक्षताम् अस्पृक्षन् प्र०
अस्पृक्षः अस्पृक्षतम् अस्पृक्षत म०
अस्पृक्षम् अस्पृक्षाव अस्पृक्षाम उ०

सूचना—लट्, लोट्, लङ्, विधिलिङ् में प्रच्छ् को पृच्छ् हो जाता है।

(५३) लिख् (लिखना) (देखो अ० १)

	लट्					
लिखति	लिखतः	लिखन्ति	प्र०			
लिखसि	लिखथः	लिखथ	म०			
लिखामि	लिखावः	लिखामः	उ०			
	लोट्					
लिखतु	लिखताम्	लिखन्तु	प्र०			
लिख	लिखतम्	लिखत	म०			
लिखानि	लिखाव	लिखाम	उ०			
	लङ्					
अलिखत्	अलिखताम्	अलिखन्	प्र०			
अलिखः	अलिखतम्	अलिखत	म०			
अलिखम्	अलिखाव	अलिखाम	उ०			
	विधिलिङ्					
लिखेत्	लिखेताम्	लिखेयुः	प्र०			
लिखेः	लिखेतम्	लिखेत	म०			
लिखेयम्	लिखेव	लिखेम	उ०			

लेखिष्यति	लेखिष्यतः	लेखिष्यन्ति	लृट्
लेखिता	लेखितारौ	लेखितारः	लुट्
लिख्यात्	लिख्यास्ताम्	लिख्यासुः	आ० लिङ्
अलेखिष्यत्	अलेखिष्यताम्	अलेखिष्यन्	लृङ्

	लिट्		
लिलेख	लिलिखतुः	लिलिखुः	प्र०
लिलेखिथ	लिलिखथुः	लिलिख	म०
लिलेख	लिलिखिव	लिलिखिम	उ०
	लुङ् (५)		
अलेखीत्	अलेखिष्टाम्	अलेखिषुः	प्र०
अलेखीः	अलेखिष्टम्	अलेखिष्ट	म०
अलेखिषम्	अलेखिष्व	अलेखिष्म	उ०

(५४) मृ (मरना) (देखो अ० ५०)

सूचना—लट्, लुट्, लङ् और लिट् में मृ परस्मै० है, अन्यत्र आत्मनेपदी।

	लट्		
प्र०	म्रियते	म्रियेते	म्रियन्ते
म०	म्रियसे	म्रियेथे	म्रियध्वे
उ०	म्रिये	म्रियावहे	म्रियामहे
	लोट्		
प्र०	म्रियताम्	म्रियेताम्	म्रियन्ताम्
म०	म्रियस्व	म्रियेथाम्	म्रियध्वम्
उ०	म्रियै	म्रियावहै	म्रियामहै
	लङ्		
प्र०	अम्रियत	अम्रियेताम्	अम्रियन्त
म०	अम्रियथाः	अम्रियेथाम्	अम्रियध्वम्
उ०	अम्रिये	अम्रियावहि	अम्रियामहि
	विधिलिङ्		
प्र०	म्रियेत	म्रियेयाताम्	म्रियेरन्
म०	म्रियेथाः	म्रियेयाथाम्	म्रियेध्वम्
उ०	म्रियेय	म्रियेवहि	म्रियेमहि

लृट्	मरिष्यति	मरिष्यतः	मरिष्यन्ति
लुट्	मर्ता	मर्तारौ	मर्तारः
आ० लिङ्	मृषीष्ट	मृषीयास्ताम्	मृषीरन्
लृङ्	अमरिष्यत्	अमरिष्यताम्	अमरिष्यन्

	लिट्		
प्र०	ममार	मम्रतुः	मम्रुः
म०	ममर्थ	मम्रथुः	मम्र
उ०	ममार, ममर	मम्रिव	मम्रिम
	लुङ् (४)		
प्र०	अमृत	अमृषाताम्	अमृषत
म०	अमृथाः	अमृषाथाम्	अमृढ्वम्
उ०	अमृषि	अमृष्वहि	अमृष्महि

(५५) मुच् (छोड़ना) (देखो अभ्यास ५१)

परस्मैपद	लट्			आत्मनेपद	लट्	
मुञ्चति	मुञ्चतः	मुञ्चन्ति	प्र०	मुञ्चते	मुञ्चेते	मुञ्चन्ते
मुञ्चसि	मुञ्चथः	मुञ्चथ	म०	मुञ्चसे	मुञ्चेथे	मुञ्चध्वे
मुञ्चामि	मुञ्चावः	मुञ्चामः	उ०	मुञ्चे	मुञ्चावहे	मुञ्चामहे
	लोट्				लोट्	
मुञ्चतु	मुञ्चताम्	मुञ्चन्तु	प्र०	मुञ्चताम्	मुञ्चेताम्	मुञ्चन्ताम्
मुञ्च	मुञ्चतम्	मुञ्चत	म०	मुञ्चस्व	मुञ्चेथाम्	मुञ्चध्वम्
मुञ्चानि	मुञ्चाव	मुञ्चाम	उ०	मुञ्चै	मुञ्चावहै	मुञ्चामहै
	लङ्				लङ्	
अमुञ्चत्	अमुञ्चताम्	अमुञ्चन्	प्र०	अमुञ्चत	अमुञ्चेताम्	अमुञ्चन्त
अमुञ्चः	अमुञ्चतम्	अमुञ्चत	म०	अमुञ्चथाः	अमुञ्चेथाम्	अमुञ्चध्वम्
अमुञ्चम्	अमुञ्चाव	अमुञ्चाम	उ०	अमुञ्चे	अमुञ्चावहि	अमुञ्चामहि
	विधिलिङ्				विधिलिङ्	
मुञ्चेत्	मुञ्चेताम्	मुञ्चेयुः	प्र०	मुञ्चेत	मुञ्चेयाताम्	मुञ्चेरन्
मुञ्चेः	मुञ्चेतम्	मुञ्चेत	म०	मुञ्चेथाः	मुञ्चेयाथाम्	मुञ्चेध्वम्
मुञ्चेयम्	मुञ्चेव	मुञ्चेम	उ०	मुञ्चेय	मुञ्चेवहि	मुञ्चेमहि
	——				——	
मोक्ष्यति	मोक्ष्यतः	मोक्ष्यन्ति	लृट्	मोक्ष्यते	मोक्ष्येते	मोक्ष्यन्ते
मोक्ता	मोक्तारौ	मोक्तारः	लुट्	मोक्ता	मोक्तारौ	मोक्तारः
मुच्यात्	मुच्यास्ताम्	मुच्यासुः	आ० लिङ्	मुक्षीष्ट	मुक्षीयास्ताम्	मुक्षीरन्
अमोक्ष्यत्	अमोक्ष्यताम्	अमोक्ष्यन्	लृङ्	अमोक्ष्यत	अमोक्ष्येताम्	अमोक्ष्यन्त
	लिट्				लिट्	
मुमोच	मुमुचतुः	मुमुचुः	प्र०	मुमुचे	मुमुचाते	मुमुचिरे
मुमोचिथ	मुमुचथुः	मुमुच	म०	मुमुचिषे	मुमुचाथे	मुमुचिध्वे
मुमोच	मुमुचिव	मुमुचिम	उ०	मुमुचे	मुमुचिवहे	मुमुचिमहे
	लुङ् (२)				लुङ् (४)	
अमुचत्	अमुचताम्	अमुचन्	प्र०	अमुक्त	अमुक्षाताम्	अमुक्षत
अमुचः	अमुचतम्	अमुचत	म०	अमुक्थाः	अमुक्षाथाम्	अमुग्ध्वम्
अमुचम्	अमुचाव	अमुचाम	उ०	अमुक्षि	अमुक्ष्वहि	अमुक्ष्महि

(७) रुधादिगण

(उभयपदी धातुएँ)

(५६) रुध् (ढकना, रोकना)

(देखो अभ्यास ५२)

परस्मैपद				आत्मनेपद		
	लट्				लट्	
रुणद्धि	रुन्धः	रुन्धन्ति	प्र०	रुन्धे	रुन्धाते	रुन्धते
रुणत्सि	रुन्धः	रुन्ध	म०	रुन्त्से	रुन्धाथे	रुन्ध्वे
रुणध्मि	रुन्ध्वः	रुन्ध्मः	उ०	रुन्धे	रुन्ध्वहे	रुन्ध्महे
	लोट्				लोट्	
रुणद्धु	रुन्धाम्	रुन्धन्तु	प्र०	रुन्धाम्	रुन्धाताम्	रुन्धताम्
रुन्धि	रुन्धम्	रुन्ध	म०	रुन्त्स्व	रुन्धाथाम्	रुन्ध्वम्
रुणधानि	रुणधाव	रुणधाम	उ०	रुणधै	रुणधावहै	रुणधामहै
	लङ्				लङ्	
अरुणत्	अरुन्धाम्	अरुन्धन्	प्र०	अरुन्ध	अरुन्धाताम्	अरुन्धत
अरुणः	अरुन्धम्	अरुन्ध	म०	अरुन्धाः	अरुन्धाथाम्	अरुन्ध्वम्
अरुणधम्	अरुन्ध्व	अरुन्ध्म	उ०	अरुन्धि	अरुन्ध्वहि	अरुन्ध्महि
	विधिलिङ्				विधिलिङ्	
रुन्ध्यात्	रुन्ध्याताम्	रुन्ध्युः	प्र०	रुन्धीत	रुन्धीयाताम्	रुन्धीरन्
रुन्ध्याः	रुन्ध्यातम्	रुन्ध्यात	म०	रुन्धीथाः	रुन्धीयाथाम्	रुन्धीध्वम्
रुन्ध्याम्	रुन्ध्याव	रुन्ध्याम	उ०	रुन्धीय	रुन्धीवहि	रुन्धीमहि
रोत्स्यति	रोत्स्यतः	रोत्स्यन्ति	लृट्	रोत्स्यते	रोत्स्येते	रोत्स्यन्ते
रोद्धा	रोद्धारौ	रोद्धारः	लुट्	रोद्धा	रोद्धारौ	रोद्धारः
रुध्यात्	रुध्यास्ताम्	रुध्यासुः	आ० लिङ्	रुत्सीष्ट	रुत्सीयास्ताम्	रुत्सीरन्
अरोत्स्यत्	अरोत्स्यताम्	अरोत्स्यन्	लृङ्	अरोत्स्यत	अरोत्स्येताम्	अरोत्स्यन्त
	लिट्				लिट्	
रुरोध	रुरुधतुः	रुरुधुः	प्र०	रुरुधे	रुरुधाते	रुरुधिरे
रुरोधिथ	रुरुधथुः	रुरुध	म०	रुरुधिषे	रुरुधाथे	रुरुधिध्वे
रुरोध	रुरुधिव	रुरुधिम	उ०	रुरुधे	रुरुधिवहे	रुरुधिमहे
	लुङ् (क) (४)				लुङ् (४)	
अरौत्सीत्	अरौद्धाम्	अरौत्सुः	प्र०	अरुद्ध	अरुत्साताम्	अरुत्सत
अरौत्सीः	अरौद्धम्	अरौद्ध	म०	अरुद्धाः	अरुत्साथाम्	अरुद्ध्वम्
अरौत्सम्	अरौत्स्व	अरौत्स्म	उ०	अरुत्सि	अरुत्स्वहि	अरुत्स्महि
	लुङ् (ख) (२)					
अरुधत्	अरुधताम्	अरुधन्	प्र०			
अरुधः	अरुधतम्	अरुधत	म०			
अरुधम्	अरुधाव	अरुधाम	उ०			

सूचना—रुन्धः, रुन्धे आदि दो ध् वाले स्थानों पर 'झरो झरि सवर्णे' से एक ध् का विकल्प से लोप होता है। रुन्द्धः, रुन्द्धे आदि रूप भी बनते हैं।

(५७) भुज् (१. पालन करना, २. भोजन करना) (देखो अ० ५३)

सूचना--भुज् धातु पालन करने अर्थ में परस्मैपदी होती है और भोजन करना, उपभोग करना अर्थ में आत्मनेपदी ही होती है।

परस्मैपद				आत्मनेपद		
	लट्				लट्	
भुनक्ति	भुङ्क्तः	भुञ्जन्ति	प्र०	भुङ्क्ते	भुञ्जाते	भुञ्जते
भुनक्षि	भुङ्क्थः	भुङ्क्थ	म०	भुङ्क्षे	भुञ्जाथे	भुङ्ग्ध्वे
भुनज्मि	भुञ्ज्वः	भुञ्ज्मः	उ०	भुञ्जे	भुञ्ज्वहे	भुञ्ज्महे
	लोट्				लोट्	
भुनक्तु	भुङ्क्ताम्	भुञ्जन्तु	प्र०	भुङ्क्ताम्	भुञ्जाताम्	भुञ्जताम्
भुङ्ग्धि	भुङ्क्तम्	भुङ्क्त	म०	भुङ्क्ष्व	भुञ्जाथाम्	भुङ्ग्ध्वम्
भुनजानि	भुनजाव	भुनजाम	उ०	भुनजै	भुनजावहै	भुनजामहै
	लङ्				लङ्	
अभुनक्	अभुङ्क्ताम्	अभुञ्जन्	प्र०	अभुङ्क्त	अभुञ्जाताम्	अभुञ्जत
अभुनक्	अभुङ्क्तम्	अभुङ्क्त	म०	अभुङ्क्थाः	अभुञ्जाथाम्	अभुङ्ग्ध्वम्
अभुनजम्	अभुञ्ज्व	अभुञ्ज्म	उ०	अभुञ्जि	अभुञ्ज्वहि	अभुञ्ज्महि
	विधिलिङ्				विधिलिङ्	
भुञ्ज्यात्	भुञ्ज्याताम्	भुञ्ज्युः	प्र०	भुञ्जीत	भुञ्जीयाताम्	भुञ्जीरन्
भुञ्ज्याः	भुञ्ज्यातम्	भुञ्ज्यात	म०	भुञ्जीथाः	भुञ्जीयाथाम्	भुञ्जीध्वम्
भुञ्ज्याम्	भुञ्ज्याव	भुञ्ज्याम	उ०	भुञ्जीय	भुञ्जीवहि	भुञ्जीमहि

भोक्ष्यति	भोक्ष्यतः	भोक्ष्यन्ति	लृट्	भोक्ष्यते	भोक्ष्येते	भोक्ष्यन्ते
भोक्ता	भोक्तारौ	भोक्तारः	लुट्	भोक्ता	भोक्तारौ	भोक्तारः
भुज्यात्	भुज्यास्ताम्	भुज्यासुः	आ० लिङ्	भुक्षीष्ट	भुक्षीयास्ताम्	०
अभोक्ष्यत्	अभोक्ष्यताम्	अभोक्ष्यन्	लृङ्	अभोक्ष्यत	अभोक्ष्येताम्	०
	लिट्				लिट्	
बुभोज	बुभुजतुः	बुभुजुः	प्र०	बुभुजे	बुभुजाते	बुभुजिरे
बुभोजिथ	बुभुजथुः	बुभुज	म०	बुभुजिषे	बुभुजाथे	बुभुजिध्वे
बुभोज	बुभुजिव	बुभुजिम	उ०	बुभुजे	बुभुजिवहे	बुभुजिमहे
	लुङ् (४)				लुङ् (४)	
अभौक्षीत्	अभौक्ताम्	अभौक्षुः	प्र०	अभुक्त	अभुक्षाताम्	अभुक्षत
अभौक्षीः	अभौक्तम्	अभौक्त	म०	अभुक्थाः	अभुक्षाथाम्	अभुग्ध्वम्
अभौक्षम्	अभौक्ष्व	अभौक्ष्म	उ०	अभुक्षि	अभुक्ष्वहि	अभुक्ष्महि

(८) तनादिगण (उभयपदी धातुएँ)

(५८) **तन्** (फैलाना) (देखो अभ्यास ५४)

परस्मैपद	लट्			आत्मनेपद	लट्	
तनोति	तनुतः	तन्वन्ति	प्र०	तनुते	तन्वाते	तन्वते
तनोषि	तनुथः	तनुथ	म०	तनुषे	तन्वाथे	तनुध्वे
तनोमि	तनुवः तन्वः	तनुमः तन्मः	उ०	तन्वे	तनुवहे तन्वहे	तनुमहे तन्महे
	लोट्				लोट्	
तनोतु	तनुताम्	तन्वन्तु	प्र०	तनुताम्	तन्वाताम्	तन्वताम्
तनु	तनुतम्	तनुत	म०	तनुष्व	तन्वाथाम्	तनुध्वम्
तनवानि	तनवाव	तनवाम	उ०	तनवै	तनवामहै	तनवामहै
	लङ्				लङ्	
अतनोत्	अतनुताम्	अतन्वन्	प्र०	अतनुत	अतन्वाताम्	अतन्वत
अतनोः	अतनुतम्	अतनुत	म०	अतनुथाः	अतन्वाथाम्	अतनुध्वम्
अतनवम्	अतनुव अतन्व	अतनुम अतन्म	उ०	अतन्वि	अतनुवहि अतन्वहि	अतनुमहि अतन्महि
	विधिलिङ्				विधिलिङ्	
तनुयात्	तनुयाताम्	तनुयुः	प्र०	तन्वीत	तन्वीयाताम्	तन्वीरन्
तनुयाः	तनुयातम्	तनुयात	म०	तन्वीथाः	तन्वीयाथाम्	तन्वीध्वम्
तनुयाम्	तनुयाव	तनुयाम	उ०	तन्वीय	तन्वीवहि	तन्वीमहि

तनिष्यति	तनिष्यतः	तनिष्यन्ति	लृट्	तनिष्यते	तनिष्येते	तनिष्यन्ते
तनिता	तनितारौ	तनितारः	लुट्	तनिता	तनितारौ	तनितारः
तन्यात्	तन्यास्ताम्	तन्यासुः	आ० लिङ्	तनिषीष्ट	तनिषीयास्ताम्	०
अतनिष्यत्	अतनिष्यताम्	अतनिष्यन्	लृङ्	अतनिष्यत	अतनिष्येताम्	०
	लिट्				लिट्	
ततान	तेनतुः	तेनुः	प्र०	तेने	तेनाते	तेनिरे
तेनिथ	तेनथुः	तेन	म०	तेनिषे	तेनाथे	तेनिध्वे
ततान, ततन	तेनिव	तेनिम	उ०	तेने	तेनिवहे	तेनिमहे
	लुङ् (क) (५)				लुङ् (५)	
अतानीत्	अतानिष्टाम्	अतानिषुः	प्र०	अतत, अतनिष्ट	अतनिषाताम्	अतनिषत
अतानीः	अतानिष्टम्	अतानिष्ट	म०	अतथाः, अतनिष्ठाः	अतनिषाथाम्	अतनिध्वम्
अतानिषम्	अतानिष्व	अतानिष्म	उ०	अतनिषि	अतनिष्वहि	अतनिष्महि

(ख) अतनीत्० (रूप अतानीत् के तुल्य चलावें)

(५९) कृ (करना) (देखो अभ्यास २२)

परस्मैपद लट्				आत्मनेपद लट्		
करोति	कुरुतः	कुर्वन्ति	प्र०	कुरुते	कुर्वाते	कुर्वते
करोषि	कुरुथः	कुरुथ	म०	कुरुषे	कुर्वाथे	कुरुध्वे
करोमि	कुर्वः	कुर्मः	उ०	कुर्वे	कुर्वहे	कुर्महे
	लोट्				लोट्	
करोतु	कुरुताम्	कुर्वन्तु	प्र०	कुरुताम्	कुर्वाताम्	कुर्वताम्
कुरु	कुरुतम्	कुरुत	म०	कुरुष्व	कुर्वाथाम्	कुरुध्वम्
करवाणि	करवाव	करवाम	उ०	करवै	करवावहै	करवामहै
	लङ्				लङ्	
अकरोत्	अकुरुताम्	अकुर्वन्	प्र०	अकुरुत	अकुर्वाताम्	अकुर्वत
अकरोः	अकुरुतम्	अकुरुत	म०	अकुरुथाः	अकुर्वाथाम्	अकुरुध्वम्
अकरवम्	अकुर्व	अकुर्म	उ०	अकुर्वि	अकुर्वहि	अकुर्महि
	विधिलिङ्				विधिलिङ्	
कुर्यात्	कुर्याताम्	कुर्युः	प्र०	कुर्वीत	कुर्वीयाताम्	कुर्वीरन्
कुर्याः	कुर्यातम्	कुर्यात	म०	कुर्वीथाः	कुर्वीयाथाम्	कुर्वीध्वम्
कुर्याम्	कुर्याव	कुर्याम	उ०	कुर्वीय	कुर्वीवहि	कुर्वीमहि
करिष्यति	करिष्यतः	करिष्यन्ति	लृट्	करिष्यते	करिष्येते	करिष्यन्ते
कर्ता	कर्तारौ	कर्तारः	लुट्	कर्ता	कर्तारौ	कर्तारः
क्रियात्	क्रियास्ताम्	क्रियासुः	आ० लिङ्	कृषीष्ट	कृषीयास्ताम्	कृषीरन्
अकरिष्यत्	अकरिष्यताम्	अकरिष्यन्	लृङ्	अकरिष्यत	अकरिष्येताम्	अकरिष्यन्त
	लिट्				लिट्	
चकार	चक्रतुः	चक्रुः	प्र०	चक्रे	चक्राते	चक्रिरे
चकर्थ	चक्रथुः	चक्र	म०	चकृषे	चक्राथे	चकृढ्वे
चकार, चकर	चकृव	चकृम	उ०	चक्रे	चकृवहे	चकृमहे
	लुङ् (४)				लुङ् (४)	
अकार्षीत्	अकार्ष्टाम्	अकार्षुः	प्र०	अकृत	अकृषाताम्	अकृषत
अकार्षीः	अकार्ष्टम्	अकार्ष्ट	म०	अकृथाः	अकृषाथाम्	अकृढ्वम्
अकार्षम्	अकार्ष्व	अकार्ष्म	उ०	अकृषि	अकृष्वहि	अकृष्महि

(९) क्र्यादिगण

(उभयपदी धातुएँ)

(६०) क्री (मोल लेना)

(देखो अभ्यास ५५)

परस्मैपद	लट्			आत्मनेपद	लट्	
क्रीणाति	क्रीणीतः	क्रीणन्ति	प्र०	क्रीणीते	क्रीणाते	क्रीणते
क्रीणासि	क्रीणीथः	क्रीणीथ	म०	क्रीणीषे	क्रीणाथे	क्रीणीध्वे
क्रीणामि	क्रीणीवः	क्रीणीमः	उ०	क्रीणे	क्रीणीवहे	क्रीणीमहे
	लोट्				लोट्	
क्रीणातु	क्रीणीताम्	क्रीणन्तु	प्र०	क्रीणीताम्	क्रीणाताम्	क्रीणताम्
क्रीणीहि	क्रीणीतम्	क्रीणीत	म०	क्रीणीष्व	क्रीणाथाम्	क्रीणीध्वम्
क्रीणानि	क्रीणाव	क्रीणाम	उ०	क्रीणै	क्रीणावहै	क्रीणामहै
	लङ्				लङ्	
अक्रीणात्	अक्रीणीताम्	अक्रीणन्	प्र०	अक्रीणीत	अक्रीणाताम्	अक्रीणत
अक्रीणाः	अक्रीणीतम्	अक्रीणीत	म०	अक्रीणीथाः	अक्रीणाथाम्	अक्रीणीध्वम
अक्रीणाम्	अक्रीणीव	अक्रीणीम	उ०	अक्रीणि	अक्रीणीवहि	अक्रीणीमहि
	विधिलिङ्				विधिलिङ्	
क्रीणीयात्	क्रीणीयाताम्	क्रीणीयुः	प्र०	क्रीणीत	क्रीणीयाताम्	क्रीणीरन्
क्रीणीयाः	क्रीणीयातम्	क्रीणीयात	म०	क्रीणीथाः	क्रीणीयाथाम्	क्रीणीध्वम्
क्रीणीयाम्	क्रीणीयाव	क्रीणीयाम	उ०	क्रीणीय	क्रीणीवहि	क्रीणीमहि

क्रेष्यति	क्रेष्यतः	क्रेष्यन्ति	लृट्	क्रेष्यते	क्रेष्येते	क्रेष्यन्ते
क्रेता	क्रेतारौ	क्रेतारः	लुट्	क्रेता	क्रेतारौ	क्रेतारः
क्रीयात्	क्रीयास्ताम्	क्रीयासुः	आ० लिङ्	क्रेषीष्ट	क्रेषीयास्ताम्	क्रेषीरन्
अक्रेष्यत्	अक्रेष्यताम्	अक्रेष्यन्	लृङ्	अक्रेष्यत	अक्रेष्येताम्	अक्रेष्यन्त
	लिट्				लिट्	
चिक्राय	चिक्रियतुः	चिक्रियुः	प्र०	चिक्रिये	चिक्रियाते	चिक्रियिरे
चिक्रयिथ, चिक्रेथ	चिक्रियथुः	चिक्रिय	म०	चिक्रियिषे	चिक्रियाथे	चिक्रियिध्वे
चिक्राय, चिक्रय	चिक्रियिव	चिक्रियिम	उ०	चिक्रिये	चिक्रियिवहे	चिक्रियिमहे
	लुङ् (४)				लुङ् (५)	
अक्रैषीत्	अक्रैष्टाम्	अक्रैषुः	प्र०	अक्रेष्ट	अक्रेषाताम्	अक्रेषत
अक्रैषीः	अक्रैष्टम्	अक्रैष्ट	म०	अक्रेष्ठाः	अक्रेषाथाम्	अक्रेढ्वम्
अक्रैषम्	अक्रैष्व	अक्रैष्म	उ०	अक्रेषि	[illegible]	[illegible]

(६१) ग्रह् (पकड़ना) (देखो अभ्यास ५६)

सूचना—ग्रह् धातु को दोनों पदों में लट्, लोट्, लङ्, विधिलिङ् में गृह् हो जाता है।

परस्मैपद	लट्			आत्मनेपद	लट्	
गृह्णाति	गृह्णीतः	गृह्णन्ति	प्र०	गृह्णीते	गृह्णाते	गृह्णते
गृह्णासि	गृह्णीथः	गृह्णीथ	म०	गृह्णीषे	गृह्णाथे	गृह्णीध्वे
गृह्णामि	गृह्णीवः	गृह्णीमः	उ०	गृह्णे	गृह्णीवहे	गृह्णीमहे
	लोट्				लोट्	
गृह्णातु	गृह्णीताम्	गृह्णन्तु	प्र०	गृह्णीताम्	गृह्णाताम्	गृह्णताम्
गृहाण	गृह्णीतम्	गृह्णीत	म०	गृह्णीष्व	गृह्णाथाम्	गृह्णीध्वम्
गृह्णानि	गृह्णाव	गृह्णाम	उ०	गृह्णै	गृह्णावहै	गृह्णामहै
	लङ्				लङ्	
अगृह्णात्	अगृह्णीताम्	अगृह्णन्	प्र०	अगृह्णीत	अगृह्णाताम्	अगृह्णत
अगृह्णाः	अगृह्णीतम्	अगृह्णीत	म०	अगृह्णीथाः	अगृह्णाथाम्	अगृह्णीध्वम्
अगृह्णाम्	अगृह्णीव	अगृह्णीम	उ०	अगृह्णि	अगृह्णीवहि	अगृह्णीमहि
	विधिलिङ्				विधिलिङ्	
गृह्णीयात्	गृह्णीयाताम्	गृह्णीयुः	प्र०	गृह्णीत	गृह्णीयाताम्	गृह्णीरन्
गृह्णीयाः	गृह्णीयातम्	गृह्णीयात	म०	गृह्णीथाः	गृह्णीयाथाम्	गृह्णीध्वम्
गृह्णीयाम्	गृह्णीयाव	गृह्णीयाम	उ०	गृह्णीय	गृह्णीवहि	गृह्णीमहि

ग्रहीष्यति	ग्रहीष्यतः	ग्रहीष्यन्ति	लृट्	ग्रहीष्यते	ग्रहीष्येते	ग्रहीष्यन्ते
ग्रहीता	ग्रहीतारौ	ग्रहीतारः	लुट्	ग्रहीता	ग्रहीतारौ	ग्रहीतारः
गृह्यात्	गृह्यास्ताम्	गृह्यासुः	आ०लिङ्	ग्रहीषीष्ट	ग्रहीषीयास्ताम्	०
अग्रहीष्यत्	अग्रहीष्यताम्	अग्रहीष्यन्	लृङ्	अग्रहीष्यत	अग्रहीष्येताम्	०
	लिट्				लिट्	
जग्राह	जगृहतुः	जगृहुः	प्र०	जगृहे	जगृहाते	जगृहिरे
जग्रहिथ	जगृहथुः	जगृह	म०	जगृहिषे	जगृहाथे	जगृहिध्वे
जग्राह, जग्रह	जगृहिव	जगृहिम	उ०	जगृहे	जगृहिवहे	जगृहिमहे
	लुङ् (५)				लुङ् (५)	
अग्रहीत्	अग्रहीष्टाम्	अग्रहीषुः	प्र०	अग्रहीष्ट	अग्रहीषाताम्	अग्रहीषत
अग्रहीः	अग्रहीष्टम्	अग्रहीष्ट	म०	अग्रहीष्ठाः	अग्रहीषाथाम्	अग्रहीध्वम्
अग्रहीषम्	अग्रहीष्व	अग्रहीष्म	उ०	अग्रहीषि	अग्रहीष्वहि	अग्रहीष्महि

(६२) ज्ञा (जानना) (देखो अभ्यास ५७)

सूचना—ज्ञा धातु को दोनों पदों में लट्, लोट्, लङ्, विधिलिङ् में 'जा' हो जाता है।

परस्मैपद	लट्			आत्मनेपद	लट्	
जानाति	जानीतः	जानन्ति	प्र०	जानीते	जानाते	जानते
जानासि	जानीथः	जानीथ	म०	जानीषे	जानाथे	जानीध्वे
जानामि	जानीवः	जानीमः	उ०	जाने	जानीवहे	जानीमहे
	लोट्				लोट्	
जानातु	जानीताम्	जानन्तु	प्र०	जानीताम्	जानाताम्	जानताम्
जानीहि	जानीतम्	जानीत	म०	जानीष्व	जानाथाम्	जानीध्वम्
जानानि	जानाव	जानाम	उ०	जानै	जानावहै	जानामहै
	लङ्				लङ्	
अजानात्	अजानीताम्	अजानन्	प्र०	अजानीत	अजानाताम्	अजानत
अजानाः	अजानीतम्	अजानीत	म०	अजानीथाः	अजानाथाम्	अजानीध्वम्
अजानाम्	अजानीव	अजानीम	उ०	अजानि	अजानीवहि	अजानीमहि
	विधिलिङ्				विधिलिङ्	
जानीयात्	जानीयाताम्	जानीयुः	प्र०	जानीत	जानीयाताम्	जानीरन्
जानीयाः	जानीयातम्	जानीयात	म०	जानीथाः	जानीयाथाम्	जानीध्वम्
जानीयाम्	जानीयाव	जानीयाम	उ०	जानीय	जानीवहि	जानीमहि

ज्ञास्यति	ज्ञास्यतः	ज्ञास्यन्ति	लृट्	ज्ञास्यते	ज्ञास्येते	ज्ञास्यन्ते
ज्ञाता	ज्ञातारौ	ज्ञातारः	लुट्	ज्ञाता	ज्ञातारौ	ज्ञातारः
(क) ज्ञायात् (ख) ज्ञेयात् (दोनों प्रकार से)			आ० लिङ्	ज्ञासीष्ट	ज्ञासीयास्ताम्	ज्ञासीरन्
अज्ञास्यत्	अज्ञास्यताम्	अज्ञास्यन्	लृङ्	अज्ञास्यत	अज्ञास्येताम्	अज्ञास्यन्त
	लिट्				लिट्	
जज्ञौ	जज्ञतुः	जज्ञुः	प्र०	जज्ञे	जज्ञाते	जज्ञिरे
जज्ञिथ, जज्ञाथ	जज्ञथुः	जज्ञ	म०	जज्ञिषे	जज्ञाथे	जज्ञिध्वे
जज्ञौ	जज्ञिव	जज्ञिम	उ०	जज्ञे	जज्ञिवहे	जज्ञिमहे
	लुङ् (४)				लुङ् (४)	
अज्ञासीत्	अज्ञासिष्टाम्	अज्ञासिषुः	प्र०	अज्ञास्त	अज्ञासाताम्	अज्ञासत
अज्ञासीः	अज्ञासिष्टम्	अज्ञासिष्ट	म०	अज्ञास्थाः	अज्ञासाथाम्	अज्ञाध्वम्
अज्ञासिषम्	अज्ञासिष्व	अज्ञासिष्म	उ०	अज्ञासि	अज्ञास्वहि	अज्ञास्महि

(१०) चुरादिगण (उभयपदी धातुएँ)

(६३) चुर् (चुराना) (देखो अभ्यास ३१–३३)

परस्मैपद लट्				आत्मनेपद लट्		
चोरयति	चोरयतः	चोरयन्ति	प्र०	चोरयते	चोरयेते	चोरयन्ते
चोरयसि	चोरयथः	चोरयथ	म०	चोरयसे	चोरयेथे	चोरयध्वे
चोरयामि	चोरयावः	चोरयामः	उ०	चोरये	चोरयावहे	चोरयामहे
	लोट्				लोट्	
चोरयतु	चोरयताम्	चोरयन्तु	प्र०	चोरयताम्	चोरयेताम्	चोरयन्ताम्
चोरय	चोरयतम्	चोरयत	म०	चोरयस्व	चोरयेथाम्	चोरयध्वम्
चोरयाणि	चोरयाव	चोरयाम	उ०	चोरयै	चोरयावहै	चोरयामहै
	लङ्				लङ्	
अचोरयत्	अचोरयताम्	अचोरयन्	प्र०	अचोरयत	अचोरयेताम्	अचोरयन्त
अचोरयः	अचोरयतम्	अचोरयत	म०	अचोरयथाः	अचोरयेथाम्	अचोरयध्वम्
अचोरयम्	अचोरयाव	अचोरयाम	उ०	अचोरये	अचोरयावहि	अचोरयामहि
	विधिलिङ्				विधिलिङ्	
चोरयेत्	चोरयेताम्	चोरयेयुः	प्र०	चोरयेत	चोरयेयाताम्	चोरयेरन्
चोरयेः	चोरयेतम्	चोरयेत	म०	चोरयेथाः	चोरयेयाथाम्	चोरयेध्वम्
चोरयेयम्	चोरयेव	चोरयेम	उ०	चोरयेय	चोरयेवहि	चोरयेमहि
चोरयिष्यति	चोरयिष्यतः	चोरयिष्यन्ति	लृट्	चोरयिष्यते	चोरयिष्येते	०
चोरयिता	चोरयितारौ	चोरयितारः	लुट्	चोरयिता	चोरयितारौ	०
चोर्यात्	चोर्यास्ताम्	चोर्यासुः	आ०लिङ्	चोरयिषीष्ट	चोरयिषीयास्ताम्	०
अचोरयिष्यत्	अचारयिष्यताम्	०	लृङ्	अचोरयिष्यत	अचोरयिष्येताम्	०

लिट् (क) (चोरयां + कृ) (कृ लिट् के तुल्य) लिट् (क) (चोरयां + कृ) (कृ लिट्वत्)

चोरयाचकार	-चक्रतुः	-चक्रुः	प्र०	चोरयांचक्रे	-चक्राते	चक्रिरे

(ख) (चोरयां + भू) (भू लिट् के तुल्य) (ख) (चोरयां + भू) (भू लिट् के तुल्य)

चोरयांबभूव	-बभूवतुः	-बभूवुः	प्र०	चोरयांबभूव	-बभूवतुः	-बभूवुः

(ग) (चोरयाम् + अस्) (ग) (चोरयाम् + अस्)

चोरयामास	-आसतुः	-आसुः	प्र०	चोरयामास	(परस्मैपद के तुल्य)	
-आसिथ	-आसथुः	-आस	म०			
-आस	-आसिव	-आसिम	उ०			
	लुङ् (३)				लुङ् (३)	
अचूचुरत्	अचूचुरताम्	अचूचुरन्	प्र०	अचूचुरत	अचूचुरेताम्	अचूचुरन्त
अचूचुरः	अचूचुरतम्	अचूचुरत	म०	अचूचुरथाः	अचूचुरेथाम्	अचूचुरध्वम्
अचूचुरम्	अचूचुराव	अचूचुराम	उ०	अचूचुरे	अचूचुरावहि	अचूचुरामहि

(६४) चिन्त् (सोचना) (चुर् धातु के तुल्य रूप चलेंगे)

परस्मैपद लट्				आत्मनेपद लट्		
चिन्तयति	चिन्तयतः	चिन्तयन्ति	प्र०	चिन्तयते	चिन्तयेते	चिन्तयन्ते
चिन्तयसि	चिन्तयथः	चिन्तयथ	म०	चिन्तयसे	चिन्तयेथे	चिन्तयध्वे
चिन्तयामि	चिन्तयावः	चिन्तयामः	उ०	चिन्तये	चिन्तयावहे	चिन्तयामहे
लोट्				लोट्		
चिन्तयतु	चिन्तयताम्	चिन्तयन्तु	प्र०	चिन्तयताम्	चिन्तयेताम्	चिन्तयन्ताम्
चिन्तय	चिन्तयतम्	चिन्तयत	म०	चिन्तयस्व	चिन्तयेथाम्	चिन्तयध्वम्
चिन्तयानि	चिन्तयाव	चिन्तयाम	उ०	चिन्तयै	चिन्तयावहै	चिन्तयामहै
लङ्				लङ्		
अचिन्तयत्	अचिन्तयताम्	अचिन्तयन्	प्र०	अचिन्तयत	अचिन्तयेताम्	अचिन्तयन्त
अचिन्तयः	अचिन्तयतम्	अचिन्तयत	म०	अचिन्तयथाः	अचिन्तयेथाम्	अचिन्तयध्वम्
अचिन्तयम्	अचिन्तयाव	अचिन्तयाम	उ०	अचिन्तये	अचिन्तयावहि	अचिन्तयामहि
विधिलिङ्				विधिलिङ्		
चिन्तयेत्	चिन्तयेताम्	चिन्तयेयुः	प्र०	चिन्तयेत	चिन्तयेयाताम्	चिन्तयेरन्
चिन्तयेः	चिन्तयेतम्	चिन्तयेत	म०	चिन्तयेथाः	चिन्तयेयाथाम्	चिन्तयेध्वम्
चिन्तयेयम्	चिन्तयेव	चिन्तयेम	उ०	चिन्तयेय	चिन्तयेवहि	चिन्तयेमहि

चिन्तयिष्यति	चिन्तयिष्यतः	०	लृट्	चिन्तयिष्यते	चिन्तयिष्येते	०
चिन्तयिता	चिन्तयितारौ	०	लुट्	चिन्तयिता	चिन्तयितारौ	०
चिन्त्यात्	चिन्त्यास्ताम्	०	आ०लिङ्	चिन्तयिषीष्ट	चिन्तयिषीयास्ताम्	०
अचिन्तयिष्यत्	अचिन्तयिष्यताम्	०	लृङ्	अचिन्तयिष्यत	अचिन्तयिष्येताम्	०

लिट् (चुर् लिट् के तुल्य)

(क) चिन्तयांचकार -चक्रतुः ०

(ख) चिन्तयांबभूव -बभूवतुः ०

(ग) चिन्तयामास -आसतुः ०

लिट् (चुर् लिट् के तुल्य)

(क) चिन्तयांचक्रे -चक्राते ०

(ख) चिन्तयांबभूव -बभूवतुः ०

(ग) चिन्तयामास -आसतुः ०

लुङ् (३)			लुङ् (३)		
अचिचिन्तत्	अचिचिन्तताम्	अचिचिन्तन्	अचिचिन्तत	अचिचिन्तेताम्	अचिचिन्तन्त
अचिचिन्तः	अचिचिन्ततम्	अचिचिन्तत	अचिचिन्तथाः	अचिचिन्तेथाम्	अचिचिन्तध्वम्
अचिचिन्तम्	अचिचिन्ताव	अचिचिन्ताम	अचिचिन्ते	अचिचिन्तावहि	अचिचिन्तामहि

(६५) कथ् (कहना) (चुर् धातु के तुल्य रूप चलेंगे)

परस्मैपद लट्				आत्मनेपद लट्		
कथयति	कथयतः	कथयन्ति	प्र०	कथयते	कथयेते	कथयन्ते
कथयसि	कथयथः	कथयथ	म०	कथयसे	कथयेथे	कथयध्वे
कथयामि	कथयावः	कथयामः	उ०	कथये	कथयावहे	कथयामहे
लोट्				लोट्		
कथयतु	कथयताम्	कथयन्तु	प्र०	कथयताम्	कथयेताम्	कथयन्ताम्
कथय	कथयतम्	कथयत	म०	कथयस्व	कथयेथाम्	कथयध्वम्
कथयानि	कथयाव	कथयाम	उ०	कथयै	कथयावहै	कथयामहै
लङ्				लङ्		
अकथयत्	अकथयताम्	अकथयन्	प्र०	अकथयत	अकथयेताम्	अकथयन्त
अकथयः	अकथयतम्	अकथयत	म०	अकथयथाः	अकथयेथाम्	अकथयध्वम्
अकथयम्	अकथयाव	अकथयाम	उ०	अकथये	अकथयावहि	अकथयामहि
विधिलिङ्				विधिलिङ्		
कथयेत्	कथयेताम्	कथयेयुः	प्र०	कथयेत	कथयेयाताम्	कथयेरन्
कथयेः	कथयेतम्	कथयेत	म०	कथयेथाः	कथयेयाथाम्	कथयेध्वम्
कथयेयम्	कथयेव	कथयेम	उ०	कथयेय	कथयेवहि	कथयेमहि

कथयिष्यति	कथयिष्यतः	कथयिष्यन्ति	लृट्	कथयिष्यते	कथयिष्येते	०
कथयिता	कथयितारौ	कथयितारः	लुट्	कथयिता	कथयितारौ	०
कथ्यात्	कथ्यास्ताम्	कथ्यासुः	आ० लिङ्	कथयिषीष्ट	कथयिषीयास्ताम्	०
अकथयिष्यत्	अकथयिष्यताम्	अकथयिष्यन्	लृङ्	अकथयिष्यत	अकथयिष्येताम्	०

लिट् (चुर् लिट् के तुल्य)			लिट् (चुर् के लिट् के तुल्य)		
(क) कथयाचकार	-चक्रतुः	०	(क) कथयांचक्रे	-चक्राते	०
(ख) कथयांबभूव	-बभूवतुः	०	(ख) कथयांबभूव	-बभूवतुः	०
(ग) कथयामास	-आसतुः	०	(ग) कथयामास	-आसतुः	०

लुङ् (३)				लुङ् (३)		
अचकथत्	अचकथताम्	अचकथन्	प्र०	अचकथत	अचकथेताम्	अचकथन्त
अचकथः	अचकथतम्	अचकथत	म०	अचकथथाः	अचकथेथाम्	अचकथध्वम्
अचकथम्	अचकथाव	अचकथाम	उ०	अचकथे	अचकथावहि	अचकथामहि

(६६) भक्ष् (खाना) (चुर् के तुल्य रूप चलेंगे)

परस्मैपद लट् | आत्मनेपद लट्

भक्षयति	भक्षयतः	भक्षयन्ति	प्र०	भक्षयते	भक्षयेते	भक्षयन्ते
भक्षयसि	भक्षयथः	भक्षयथ	म०	भक्षयसे	भक्षयेथे	भक्षयध्वे
भक्षयामि	भक्षयावः	भक्षयामः	उ०	भक्षये	भक्षयावहे	भक्षयामहे
	लोट्				लोट्	
भक्षयतु	भक्षयताम्	भक्षयन्तु	प्र०	भक्षयताम्	भक्षयेताम्	भक्षयन्ताम्
भक्षय	भक्षयतम्	भक्षयत	म०	भक्षयस्व	भक्षयेथाम्	भक्षयध्वम्
भक्षयाणि	भक्षयाव	भक्षयाम	उ०	भक्षयै	भक्षयावहै	भक्षयामहै
	लङ्				लङ्	
अभक्षयत्	अभक्षयताम्	अभक्षयन्	प्र०	अभक्षयत	अभक्षयेताम्	अभक्षयन्त
अभक्षयः	अभक्षयतम्	अभक्षयत	म०	अभक्षयथाः	अभक्षयेथाम्	अभक्षयध्वम्
अभक्षयम्	अभक्षयाव	अभक्षयाम	उ०	अभक्षये	अभक्षयावहि	अभक्षयामहि
	विधिलिङ्				विधिलिङ्	
भक्षयेत्	भक्षयेताम्	भक्षयेयुः	प्र०	भक्षयेत	भक्षयेयाताम्	भक्षयेरन्
भक्षयेः	भक्षयेतम्	भक्षयेत	म०	भक्षयेथाः	भक्षयेयाथाम्	भक्षयेध्वम्
भक्षयेयम्	भक्षयेव	भक्षयेम	उ०	भक्षयेय	भक्षयेवहि	भक्षयेमहि

भक्षयिष्यति	भक्षयिष्यतः	भक्षयिष्यन्ति	लृट्	भक्षयिष्यते	भक्षयिष्येते	०
भक्षयिता	भक्षयितारौ	भक्षयितारः	लुट्	भक्षयिता	भक्षयितारौ	०
भक्ष्यात्	भक्ष्यास्ताम्	भक्ष्यासुः	आ. लिङ्	भक्षयिषीष्ट	भक्षयिषीयास्ताम्	०
अभक्षयिष्यत्	अभक्षयिष्यताम्	अभक्षयिष्यन्	लृङ्	अभक्षयिष्यत	अभक्षयिष्येताम्	०

लिट् (चुर् के तुल्य) | लिट् (चुर् कै तुल्य)

(क) भक्षयांचकार	-चक्रतुः	०	(क) भक्षयांचक्रे	-चक्राते	०
(ख) भक्षयांबभूव	-बभूवतुः	०	(ख) भक्षयांबभूव	-बभूवतुः	०
(ग) भक्षयामास	-आसतुः	०	(ग) भक्षयामास	-आसतुः	०

लुङ् (३) | लुङ् (३)

अबभक्षत्	अबभक्षताम्	अबभक्षन्	प्र०	अबभक्षत	अबभक्षेताम्	अबभक्षन्त
अबभक्षः	अबभक्षतम्	अबभक्षत	म०	अबभक्षथाः	अबभक्षेथाम्	अबभक्षध्वम्
अबभक्षम्	अबभक्षाव	अबभक्षाम	उ०	अबभक्षे	अबभक्षावहि	अबभक्षामहि

प्रेरणार्थक णिच् प्रत्यय (देखो अभ्यास २८-२९)

(६७) कारि (कृ + णिच्, करवाना) (चुर् के तुल्य रूप चलेंगे)

परस्मैपद	लट्			आत्मनेपद	लट्	
कारयति	कारयतः	कारयन्ति	प्र०	कारयते	कारयेते	कारयन्ते
कारयसि	कारयथः	कारयथ	म०	कारयसे	कारयेथे	कारयध्वे
कारयामि	कारयावः	कारयामः	उ०	कारये	कारयावहे	कारयामहे
	लोट्				लोट्	
कारयतु	कारयताम्	कारयन्तु	प्र०	कारयताम्	कारयेताम्	कारयन्ताम्
कारय	कारयतम्	कारयत	म०	कारयस्व	कारयेथाम्	कारयध्वम्
कारयाणि	कारयाव	कारयाम	उ०	कारयै	कारयावहै	कारयामहै
	लङ्				लङ्	
अकारयत्	अकारयताम्	अकारयन्	प्र०	अकारयत	अकारयेताम्	अकारयन्त
अकारयः	अकारयतम्	अकारयत	म०	अकारयथाः	अकारयेथाम्	अकारयध्वम्
अकारयम्	अकारयाव	अकारयाम	उ०	अकारये	अकारयावहि	अकारयामहि
	विधिलिङ्				विधिलिङ्	
कारयेत्	कारयेताम्	कारयेयुः	प्र०	कारयेत	कारयेयाताम्	कारयेरन्
कारयेः	कारयेतम्	कारयेत	म०	कारयेथाः	कारयेयाथाम्	कारयेध्वम्
कारयेयम्	कारयेव	कारयेम	उ०	कारयेय	कारयेवहि	कारयेमहि

कारयिष्यति	कारयिष्यतः	कारयिष्यन्ति	लृट्	कारयिष्यते	कारयिष्येते	०
कारयिता	कारयितारौ	कारयितारः	लुट्	कारयिता	कारयितारौ	०
कार्यात्	कार्यास्ताम्	कार्यासुः	आ०लिङ्	कारयिषीष्ट	कारयिषीयास्ताम्	०
अकारयिष्यत्	अकारयिष्यताम्	अकारयिष्यन्	लृङ्	अकारयिष्यत	अकारयिष्येताम्	०

लिट् (चुर् के तुल्य)			लिट् (चुर् के तुल्य)		
(क) कारयांचकार	-चक्रतु	०	(क) कारयांचक्रे	-चक्राते	०
(ख) कारयांबभूव	-बभूवतुः	०	(ख) कारयांबभूव	-बभूवतुः	०
(ग) कारयामास	-आसतुः	०	(ग) कारयामास	-आसतुः	०

	लुङ् (३)				लुङ् (३)	
अचीकरत्	अचीकरताम्	अचीकरन्	प्र०	अचीकरत	अचीकरेताम्	अचीकरन्त
अचीकरः	अचीकरतम्	अचीकरत	म०	अचीकरथाः	अचीकरेथाम्	अचीकरध्वम्
अचीकरम्	अचीकराव	अचीकराम	उ०	अचीकरे	अचीकरावहि	अचीकरामहि

(४) संक्षिप्त धातुकोष

आवश्यक निर्देश

(पुस्तक में प्रयुक्त धातुओं के रूप, अकारादिक्रम से)

१. इस पुस्तक में जिन धातुओं का प्रयोग हुआ है, उनके प्रारम्भिक रूप यहाँ पर दिये गये हैं। प्रचलित लट् आदि ५ लकारों के ही रूप दिये गये हैं। प्रत्येक लकार का प्रथम रूप अर्थात् प्रथम पुरुष एकवचन का रूप दिया गया है। जो धातु जिस गण की है, उस धातु के रूप उस गण की धातुओं के तुल्य चलेंगे। धातुरूप-संग्रह में उनके संक्षिप्त रूपों का निर्देश किया जा चुका है। जो उभयपदी धातुएँ परस्मैपद में ही अधिक प्रचलित हैं, उनके परस्मैपद के ही रूप दिये गये हैं।

२. प्रत्येक धातु के रूप इस क्रम से दिये गये हैं—लट्, लोट्, लङ्, विधिलिङ् और लृट्। अन्त में कर्मवाच्य या भाववाच्य का प्र० पु० एक० का रूप दिया गया है।

३. प्रत्येक धातु के बाद कोष्ठ में निर्देश कर दिया गया है कि वह किस गण की है तथा किस पद में उसके रूप चलते हैं। अन्त में कोष्ठ में संख्यायें दी हैं, वे इस बात का निर्देश करती हैं कि उस धातु का उस अभ्यास में प्रयोग हुआ है। सभी धातुएँ अकारादि क्रम से दी गई हैं।

४. संक्षेप के लिए निम्नलिखित संकेतों का प्रयोग किया गया है :—प० परस्मैपदी। आ० = आत्मनेपदी। उ० = उभयपदी। १ = भ्वादिगण। २ = अदादिगण। ३ = जुहोत्यादिगण। ४ = दिवादिगण। ५ = स्वादिगण। ६ = तुदादिगण। ७ = रुधादिगण। ८ = तनादिगण। ९ = क्र्यादिगण। १० = चुरादिगण। ११ = कण्ड्वादिगण।

५. धातु के साथ उपसर्ग हो तो लङ् में शुद्ध धातु से पहले अ या आ लगावें। उपसर्ग से पूर्व नहीं। (देखो नियम ९६)।

अद् (२ प०, खाना) अत्ति, अत्तु, आदत्, अद्यात्, अत्स्यति। अद्यते। (२३)
अय् (१ आ०, जाना) अयते, अयताम्, आयत, अयेत, अयिष्यते। अय्यते (१८)
अर्च् (१ प०, पूजना) अर्चति, अर्चतु, आर्चत्, अर्चेत्, अर्चिष्यति। अर्च्यते। (१४)
अश् (९प०, खाना) अश्नाति, अश्नातु, आश्नात्, अश्नीयात्, अशिष्यति। अश्यते (५५)
अस् (२ प०, होना) अस्ति, अस्तु, आसीत्, स्यात्, भविष्यति। भूयते (४)
अस् (४प०, फेंकना) अस्यति, अस्यतु, आस्यत्, अस्येत्, असिष्यति। अस्यते। (१७,४१)
असूय (११प०, द्रोह०) असूयति, असूयतु, आसूयत्, असूयेत्, असूयिष्यति। असूय्यते (११)
आप् (५प०, पाना) आप्नोति, आप्नोतु, आप्नोत्, आप्नुयात्, आप्स्यति। आप्यते। (२८,४८)

आस् (२ अ०, बैठना) आस्ते, आस्ताम्, आस्त, आसीत, आसिष्यते । आस्यते । (३६)
इ (अधि +, २ आ०, पढ़ना) अधीते, अधीताम्, अध्यैत, अधीयीत, अध्येष्यते । अधीयते । (१२) ।
इ (२ प०, जाना) एति, एतु, ऐत्, इयात्, एष्यति । ईयते । (३०)
इष् (६ प०, चाहना) इच्छति, इच्छतु, ऐच्छत्, इच्छेत एषिष्यति । इष्यते । (५)
ईक्ष् (१ आ०, देखना) ईक्षते, ईक्षताम्, ऐक्षत, ईक्षेत, ईक्षिष्यते । ईक्ष्यते । (१६)
ईर् (१० उ०, प्रेरणा०) ईरयति, ईरयतु, ऐरयत्, ईरयेत्, ईरयिष्यति । ईर्यते । (३१)
ईर्ष्य् (१ प०, ईर्ष्या०) ईर्ष्यति, ईर्ष्यतु, ऐर्ष्यत्, ईर्ष्येत्, ईर्ष्यिष्यति । ईर्ष्यते । (११)
ईह् (१ आ०, चाहना) ईहते, ईहताम्, ऐहत, ईहेत, ईहिष्यते । ईह्यते । (१६)
कथ् (१० उ०, कहना) प०—कथयति, कथयतु, अकथयत्, कथयेत्, कथयिष्यति । आ०—कथयते, कथयताम्, अकथयत, कथयेत, कथयिष्यते । कथ्यते । (४)
कम्प् (१आ०, काँपना) कम्पते, कम्पताम्, अकम्पत, कम्पेत, कम्पिष्यते । कम्प्यते । (१६)
कुप् (४ प०, क्रोध०) कुप्यति, कुप्यतु, अकुप्यत्, कुप्येत्, कोपिष्यति । कुप्यते । (११)
कुर्द् (१ आ०, कूदना) कूर्दते, कूर्दताम्, अकूर्दत, कूर्देत, कूर्दिष्यते । कूर्द्यते । (१६)
कृ (८ उ०, करना) प०—करोति, करोतु, अकरोत्, कुर्यात्, करिष्यति ।
आ०—कुरुते, कुरुताम्, अकुरुत, कुर्वीत, करिष्यते । क्रियते । (४, २२)
क्लृप् (१ आ०, समर्थ होना) कल्पते, कल्पताम्, अकल्पत, कल्पेत, कल्पिष्यते । कल्प्यते । (१८)
कृष् (१ प०, खींचना) कर्षति, कर्षतु, अकर्षत्, कर्षेत्, कर्क्ष्यति । कृष्यते । (७)
कॄ (६ प०, बखेरना) किरति, किरतु, अकिरत्, किरेत्, करिष्यति । कीर्यते । (५०)
कॄत् (१० उ०, नाम लेना) कीर्तयति, कीर्तयतु, अकीर्तयत्, कीर्तयेत्, कीर्तयिष्यति । कीर्त्यते । (३३)
क्रन्द् (१ प०, रोना) क्रन्दति, क्रन्दतु, अक्रन्दत्, क्रन्देत्, क्रन्दिष्यति । क्रन्द्यते । (११)
क्रम् (१ प०, चलना) क्रामति, क्रामतु, अक्रामत्, क्रामेत्, क्रमिष्यति । क्रम्यते । (२९)
क्री (९ उ०, खरीदना) प० —क्रीणाति, क्रीणातु, अक्रीणात्, क्रीणीयात्, क्रेष्यति ।
आ०—क्रीणीते, क्रीणीताम्, अक्रीणीत, क्रीणीत, क्रेष्यते । क्रीयते । (५५)
क्रीड् (१ प०, खेलना) क्रीडति, क्रीडतु, अक्रीडत्, क्रीडेत्, क्रीडिष्यति । क्रीड्यते । (६)
क्रुध् (४प०, क्रुद्ध होना) क्रुध्यति, क्रुध्यतु, अक्रुध्यत्, क्रुध्येत्, क्रोत्स्यति । क्रुध्यते । (११)
क्लम् (४ प०, थकना) क्लाम्यति, क्लाम्यतु, अक्लाम्यत्, क्लाम्येत्, क्लमिष्यति । क्लम्यते । (४४)
क्लिश् (४आ०, खिन्न होना) क्लिश्यते, क्लिश्यताम्, अक्लिश्यत, क्लिश्येत, क्लेशिष्यते । क्लिश्यते । (४५)
क्लिश् (९ प०, दुःख देना) क्लिश्नाति, क्लिश्नातु, अक्लिश्नात्, क्लिश्नीयात्, क्लेशिष्यति । क्लिश्यते । (५५)
क्षम् (१ आ०, क्षमा करना) क्षमते, क्षमताम्, अक्षमत, क्षमेत, क्षमिष्यते । क्षम्यते । (१९)

क्षल् (१० उ०, धोना) प०—क्षालयति, क्षालयतु, अक्षालयत्, क्षालयेत्, क्षालयिष्यति।
आ०—क्षालयते, क्षालयताम्, अक्षालयत, क्षालयेत, क्षालयिष्यते। क्षाल्यते (३१)
क्षिप् (६ उ०, फेंकना) क्षिपति, क्षिपतु, अक्षिपत्, क्षिपेत्, क्षेप्स्यति। क्षिप्यते। (१७,५०)
क्षुभ् (१आ०,क्षुब्ध होना) क्षोभते,क्षोभताम्, अक्षोभत, क्षोभेत, क्षोभिष्यते। क्षुभ्यते। (२४)
खण्ड् (१० उ०, खंडन करना) खण्डयति, खण्डयतु, अखण्डयत्, खण्डयेत्, खण्डयिष्यति।
खण्ड्यते। (३२)
खन् (१ उ०, खोदना) खनति, खनतु, अखनत्, खनेत्, खनिष्यति। खन्यते। (१४)
खाद् (१ प०, खाना) खादति, खादतु, अखादत्, खादेत्, खादिष्यति। खाद्यते। (६)
गण् (१०उ०,गिनना)गणयति,गणयतु, अगणयत्, गणयेत्, गणयिष्यति। गण्यते। (३१)
गम् (१ प०, जाना) गच्छति, गच्छतु, अगच्छत्, गच्छेत्, गमिष्यति। गम्यते। (१)
गर्ज् (१ प०, गरजना) गर्जति, गर्जतु, अगर्जत्, गर्जेत्, गर्जिष्यति। गर्ज्यते। (१५)
गर्ह् (१० उ०, निन्दा करना) गर्हयति, गर्हयतु, अगर्हयत्, गर्हयेत्, गर्हयिष्यति।
गर्ह्यते। (३३)
गवेष् (१० उ०, खोजना) गवेषयति, गवेषयतु, अगवेषयत्, गवेषयेत्, गवेषयिष्यति।
गवेष्यते (३३)
गाह् (१ आ०, घुसना) गाहते, गाहताम्, अगाहत, गाहेत, गाहिष्यते। गाह्यते। (१९)
गुप् (१ आ०, निन्दा करना) जुगुप्सते, जुगुप्सताम्, अजुगुप्सत, जुगुप्सेत, जुगुप्सिष्यते।
जुगुप्स्यते। (१३)
गॄ (६ प०, निगलना) गिरति, गिरतु, अगिरत्, गिरेत्, गरिष्यति। गीर्यति। (२७,५०)
गै (१ प०, गाना) गायति, गायतु, अगायत्, गायेत्, गास्यति। गीयते। (८)
ग्रस् (१ आ०, खाना) ग्रसते, ग्रसताम्, अग्रसत, ग्रसेत, ग्रसिष्यते। ग्रस्यते। (२३)
ग्राह् (९ उ०, पकड़ना) प०—गृह्णाति, गृह्णातु, अगृह्णात्, गृह्णीयात्, ग्रहीष्यति।
आ०—गृह्णीते, गृह्णीताम्, अगृह्णीत, गृह्णीत, ग्रहीष्यते। गृह्यते। (२७,५६)
घट् (१ आ०, लगना) घटते, घटताम्, अघटत, घटेत, घटिष्यते। घट्यते। (२९)
घुष् (१० उ०, घोषित करना) घोषयति, घोषयतु, अघोषयत्, घोषयेत्, घोषयिष्यति।
घोष्यते। (३२)
घ्रा (१ प०, सूँघना) जिघ्रति, जिघ्रतु, अजिघ्रत्, जिघ्रेत्, घ्रास्यति। घ्रायते। (३)
चर् (१ प०, चलना) चरति, चरतु, अचरत्, चरेत्, चरिष्यते। चर्यते। (८)
चल् (१ प०, चलना) चलति, चलतु, अचलत्, चलेत्, चलिष्यति। चल्यते। (६)
चि (५ उ०, चुनना) चिनोति, चिनोतु, अचिनोत्, चिनुयात्, चेष्यति। चीयते। (७)
चिन्त् (१०उ०, सोचना) प०—चिन्तयति,चिन्तयतु,अचिन्तयत्,चिन्तयेत्, चिन्तयिष्यति।
आ०—चिन्तयते, चिन्तयताम्, अचिन्तयत, चिन्तयेत, चिन्तयिष्यते। चिन्त्यते। (४)
चुर् (१० उ०, चुराना) प०—चोरयति, चोरयतु, अचोरयत्, चोरयेत्, चोरयिष्यति।
आ०—चोरयते, चोरयताम्, अचोरयत, चोरयेत, चोरयिष्यते। चोर्यते। (४)

चेष्ट् (१ आ०, चेष्टा करना) चेष्टते, चेष्टताम्, अचेष्टत, चेष्टेत, चेष्टिष्यते। चेष्ट्यते। (१८)

छिद् (७ उ०, काटना) छिनत्ति, छिनत्तु, अच्छिनत्, छिन्द्यात्, छेत्स्यति। छिद्यते। (५२)

जन् (४ आ०, पैदा होना) जायते, जायताम्, अजायत, जायेत, जनिष्यते। जायते। (१३, २९, ४६)

जप् (१ प०, जपना) जपति, जपतु, अजपत्, जपेत्, जपिष्यति। जप्यते। (१४)

जि (१ प०, जीतना) जयति, जयतु, अजयत्, जयेत्, जेष्यति। जीयते। (३)

जीव् (१ प०, जीना) जीवति, जीवतु, अजीवत्, जीवेत्, जीविष्यति। जीव्यते। (१४)

जृ (४ प०, वृद्ध होना) जीर्यति, जीर्यतु, अजीर्यत्, जीर्येत्, जरिष्यति। जीर्यते। (२७)

ज्ञा (९ उ०, जानना) प०—जानाति, जानातु, अजानात्, जानीयात्, ज्ञास्यति।
आ०—जानीते, जानीताम्, अजानीत, जानीत, ज्ञास्यते। ज्ञायते। (५७)

ज्वल् (१ प०, जलना) ज्वलति, ज्वलतु, अज्वलत्, ज्वलेत्, ज्वलिष्यति। ज्वल्यते। (८)

डी (४ आ०, उड़ना) डीयते, डीयताम्, अडीयत, डीयेत, डयिष्यते। डीयते। (४५)

तड् (१० उ०, पीटना) ताडयति, ताडयतु, अताडयत्, ताडयेत्, ताडयिष्यति। ताड्यते। (३२)

तन् (८ उ०, फैलाना) प०—तनोति, तनोतु, अतनोत्, तनुयात्, तनिष्यति।
आ०—तनुते, तनुताम्, अतनुत, तन्वीत, तनिष्यते। तायते-तन्यते। (५४)

तप् (१ प०, तपना) तपति, तपतु, अतपत्, तपेत्, तप्स्यति। तप्यते। (८)

तर्क् (१० उ०, सोचना) तर्कयति, तर्कयतु, अतर्कयत्, तर्कयेत्, तर्कयिष्यति। तर्क्यते। (३३)

तर्ज् (१० आ०, डाँटना) तर्जयते, तर्जयताम्, अतर्जयत्, तर्जयेत, तर्जयिष्यते। तर्ज्यते। (३३)

तुद् (६ उ०, दुःख देना) तुदति-ते, तुदतु, अतुदत्, तुदेत्, तोत्स्यति। तुद्यते। (५)

तुल् (१० उ०, तोलना) तोलयति, तोलयतु, अतोलयत्, तोलयेत्, तोलयिष्यति। तोल्यते। (३२)

तुष् (४ प०, तुष्ट होना) तुष्यति, तुष्यतु, अतुष्यत्, तुष्येत्, तोक्ष्यति। तुष्यते। (४२)

तृप् (४ प०, तृप्त होना) तृप्यति, तृप्यतु, अतृप्यत्, तृप्येत्, तर्पिष्यति। तृप्यते। (४२)

तृप् (१० उ०, तृप्त करना) तर्पयति–ते, तर्पयतु, अतर्पयत्, तर्पयेत्, तर्पयिष्यति। तर्प्यते (३२)। (१०, १४)

तॄ (१ प०, तैरना) तरति, तरतु, अतरत्, तरेत्, तरिष्यति। तीर्यते। (७)

त्यज् (१ प०, छोड़ना) त्यजति, त्यजतु, अत्यजत्, त्यजेत्, त्यक्ष्यति। त्यज्यते। (१८)

त्रप् (१ आ०, लजाना) त्रपते, त्रपताम्, अत्रपत, त्रपेत, त्रपिष्यते। त्रप्यते। (१२)

त्रै (१ आ०, बचाना) त्रायते, त्रायताम्, अत्रायत, त्रायेत, त्रास्यते। त्रायते। (२४)

त्वर् (१ आ०, जल्दी करना) त्वरते, त्वरताम्, अत्वरत, त्वरेत, त्वरिष्यते। त्वर्यते।

दण्ड् (१० उ०, दंड देना) दण्डयति-ते, दण्डयतु, अदण्डयत्, दण्डयेत्, दण्डयिष्यति। दण्ड्यते। (७)

दम् (४ प०, दमन करना) दाम्यति, दाम्यतु, अदाम्यत्, दाम्येत्, दमिष्यति। दम्यते। (२९,४४)

दह् (१ प०, जलाना) दहति, दहतु, अदहत्, दहेत्, धक्ष्यति। दह्यते। (८)

दा (३ उ०, देना) प०—ददाति, ददातु, अददात्, दद्यात्, दास्यति।
आ०—दत्ते, दत्ताम्, अदत्त, ददीत, दास्यते। दीयते। (१०, ४०)

दिव् (४ प०, जुआ खेलना) दीव्यति, दीव्यतु, अदीव्यत्, दीव्येत्, देविष्यति। दीव्यते। (४१)

दिश् (६ उ०, देना, कहना) दिशति-ते, दिशतु, अदिशत्, दिशेत्, देक्ष्यति। दिश्यते। (११, ५०)

दीक्ष् (१ आ०, दीक्षा देना) दीक्षते, दीक्षताम्, अदीक्षत, दीक्षेत, दीक्षिष्यते। दीक्ष्यते। (१९)

दीप् (४आ०, चमकना) दीप्यते, दीप्यताम्, अदीप्यत, दीप्येत, दीपिष्यते। दीप्यते। (४५)

दुह् (२ उ०, दुहना) दोग्धि, दोग्धु, अधोक्, दुह्यात्, धोक्ष्यति। दुह्यते। (७, २७)

दृ (६ आ०, आदर करना) आ +, आद्रियते, आद्रियताम्, आद्रियत, आद्रियेत, आदरिष्यते। आद्रियते। (१७)

दृश् (१ प०, देखना) पश्यति, पश्यतु, अपश्यत्, पश्येत्, द्रक्ष्यति। दृश्यते। (३)

द्युत् (१ आ०, चमकना) द्योतते, द्योतताम्, अद्योतत, द्योतेत, द्योतिष्यते। द्युत्यते। (१८)

द्रुह् (४प०, द्रोह करना) द्रुह्यति, द्रुह्यतु, अद्रुह्यत्, द्रुह्येत्, द्रोहिष्यति। द्रुह्यते। (११)

धा (३ उ०, धारण करना) प०-दधाति, दधातु, अदधात्, दध्यात्, धास्यति।
आ०-धत्ते, धत्ताम्, अधत्त, दधीत, धास्यते। धीयते। (२७, ४०)

धाव् (१ उ०, दौड़ना) धावति-ते, धावतु, अधावत्, धावेत्, धाविष्यति। धाव्यते। (६)

धृ (१० उ०, पहनना, रखना) धारयति, धारयतु, अधारयत्, धारयेत्, धारयिष्यति। धार्यते। (११)

ध्यै (१ प०, ध्यान करना) ध्यायति, ध्यायतु, अध्यायत्, ध्यायेत्, ध्यास्यति। ध्यायते। (१४)

ध्वंस् १ आ०, नष्ट होना) ध्वंसते, ध्वंसताम्, अध्वंसत, ध्वंसेत, ध्वंसिष्यते। ध्वस्यते। (१९)

नम् (१ प०, झुकना) नमति, नमतु, अनमत्, नमेत्, नंस्यति। नम्यते। (२)

नश् (४ प०, नष्ट होना) नश्यति, नश्यतु, अनश्यत्, नश्येत्, नशिष्यति। नश्यते। (४३)

निन्द् (१ प०, निन्दा करना) निन्दति, निन्दतु, अनिन्दत्, निन्देत्, निन्दिष्यति। निन्द्यते। (१४)

नी (१ उ०, ले जाना) प०—नयति, नयतु, अनयत्, नयेत्, नेष्यति।
आ०—नयते, नयताम्, अनयत, नयेत, नेष्यते। नीयते। (७, १२, २१)

नुद् (६ उ०, प्रेरणा देना) नुदति-ते, नुदतु, अनुदत्, नुदेत्, नोत्स्यति। नुद्यते। (५०)

नृत् (४ प०, नाचना) नृत्यति, नृत्यतु, अनृत्यत्, नृत्येत्, नर्तिष्यति। नृत्यते। (४२)

पच् (१ उ०, पकाना) पचति-ते, पचतु, अपचत्, पचेत्, पक्ष्यति। पच्यते। (२)
पठ् (१ प०, पढ़ना) पठति, पठतु, अपठत्, पठेत्, पठिष्यति। पठ्यते। (१)
पत् (१ प०, गिरना) पतति, पततु, अपतत्, पतेत्, पतिष्यति। पत्यते। (२)
पद् (४ आ०, जाना) पद्यते, पद्यताम्, अपद्यत, पद्येत, पत्स्यते। पद्यते। (४६)
पा (१ प०, पीना) पिबति, पिबतु, अपिबत्, पिबेत्, पास्यति। पीयते। (३)
पा (२ प०, रक्षा करना) पाति, पातु, अपात्, पायात्, पास्यति। पायते। (२९)
पाल् (१० उ०, रक्षा करना) पालयति ते, पालयतु, अपालयत्, पालयेत्, पालयिष्यति। पाल्यते। (३१)
पीड् (१० उ०, दुःख देना) पीडयति-ते, पीडयतु, अपीडयत्, पीडयेत्, पीडयिष्यति। पीड्यते। (३१)
पुष् (४ प०, पुष्ट करना) पुष्यति, पुष्यतु, अपुष्यत्, पुष्येत्, पोक्ष्यति। पुष्यते। (३२,४२)
पृ (१० उ०, पालना) पारयति-ते, पारयतु, अपारयत्, पारयेत्, पारयिष्यति। पार्यते। (२७)
प्रच्छ् (६ प०, पूछना) पृच्छति, पृच्छतु, अपृच्छत्, पृच्छेत्, प्रक्ष्यति। पृच्छ्यते। (५)
प्रथ् (१ आ०, फैलना) प्रथते, प्रथताम्, अप्रथत, प्रथेत, प्रथिष्यते। प्रथ्यते (२४)
प्र + ईर् (१० उ०, प्रेरणा देना) प्रेरयति, प्रेरयतु, प्रेरयत्, प्रेरयेत्, प्रेरयिष्यति। प्रेर्यते। (२७, ५५) (३१)
बन्ध (९ प०, बाँधना) बध्नाति, बध्नातु, अबध्नात्, बध्नीयात्, भन्त्स्यति। बध्यते।
बाध् (१आ०, पीड़ा देना) बाधते, बाधताम्, अबाधत, बाधेत, बाधिष्यते। बाध्यते। (२३)
बुध् (४ आ०, जानना) बुध्यते, बुध्यताम्, अबुध्यत, बुध्येत, भोत्स्यते। बुध्यते। (२९)
ब्रू (२ उ०, बोलना) ब्रवीति, ब्रवीतु, अब्रवीत्, ब्रूयात्, वक्ष्यति। उच्यते। (७,२५)
भक्ष् (१० उ०, खाना) प०—भक्षयति, भक्षयतु, अभक्षयत्, भक्षयेत्, भक्षयिष्यति। आ०—भक्षयते, भक्षयताम्, अभक्षयत, भक्षयेत, भक्षयिष्यते। भक्ष्यते। (४)
भज् (१ उ०, सेवा करना) भजति-ते, भजतु, अभजत्, भजेत्, भक्ष्यति। भज्यते। (११, २७)
भा (२ प०, चमकना) भाति, भातु, अभात्, भायात्, भास्यति। भायते। (२९)
भाष् (१आ०, बोलना) भाषते, भाषताम्, अभाषत, भाषेत, भाषिष्यते। भाष्यते। (१६)
भास् (१आ०, चमकना) भासते, भासताम्, अभासत, भासेत, भासिष्यते। भास्यते (१९)
भिक्ष् (१आ०,माँगना) भिक्षते, भिक्षताम्, अभिक्षत, भिक्षेत, भिक्षिष्यते। भिक्ष्यते। (१६)
भिद् (७ उ०, तोड़ना) भिनत्ति, भिनत्तु, अभिनत्, भिन्द्यात्, भेत्स्यति। भिद्यते। (५२)
भी (३ प०, डरना) बिभेति, बिभेतु, अबिभेत्, बिभीयात्, भेष्यति। भीयते। (१२)
भुज् (७ उ०, पालना) प०—भुनक्ति, भुनक्तु, अभुनक्, भुञ्ज्यात्, भोक्ष्यति। (७ आ०, खाना) आ०—भुङ्क्ते, भुङ्क्ताम्, अभुङ्क्त, भुञ्जीत, भोक्ष्यते। भुंज्यते। (२८, ५३)
भू (१ प०, होना) भवति, भवतु, अभवत्, भवेत्, भविष्यति। भूयते। (१)

भृ (१उ०, पालन करना) भरति-ते, भरतु, अभरत्, भरेत्, भरिष्यति। भ्रियते। (१५)
भ्रम् (१ प०, घूमना) भ्रमति, भ्रमतु, अभ्रमत्, भ्रमेत्, भ्रमिष्यति। भ्रम्यते। (७)
भ्रम् (४ प०, घूमना) भ्राम्यति, भ्राम्यतु, अभ्राम्यत्, भ्राम्येत्, भ्रमिष्यति। भ्रम्यते। (४४)
भ्रंश् (१आ०, गिरना) भ्रंशते, भ्रंशताम्, अभ्रंशत, भ्रंशेत, भ्रंशिष्यते। भ्रंश्यते। (२४)
भ्राज् (१आ०, चमकना) भ्राजते, भ्राजताम्, अभ्राजत, भ्राजेत, भ्राजिष्यते। भ्राज्यते। (२४)
मण्ड् (१० उ०, मंडन करना) मण्डयति, मण्डयतु, अमण्डयत्, मण्डयेत्, मण्डयिष्यति। मण्ड्यते। (३२)
मथ् (१ प०, मथना) मथति, मथतु, अमथत्, मथेत्, मथिष्यति। मथ्यते। (७)
मद् (४ प०, खुश होना) माद्यति, माद्यतु, अमाद्यत्, माद्येत्, मदिष्यति। मद्यते। (१३)
मन् (४ आ, मानना) मन्यते, मन्यताम्, अमन्यत, मन्येत, मंस्यते। मन्यते। (४६)
मन्त्र् (१ आ०, मन्त्रणा करना) मन्त्रयते, मन्त्रयताम्, अमन्त्रयत, मन्त्रयेत, मन्त्रयिष्यते। मन्त्र्यते। (परस्मै०) मन्त्रयति, मन्त्रयतु, अमन्त्रयत्, मन्त्रयेत्, मन्त्रयिष्यति। (३३)
मन्थ् (९ प०, मथना) मथ्नाति, मथ्नातु, अमथ्नात्, मथ्नीयात्, मन्थिष्यति। मथ्यते। (२७, ५५)
मा (२ प०, नापना) माति, मातु, अमात्, मायात्, मास्यति। मीयते। (२७)
मुच् (६ उ०, छोड़ना) प०—मुञ्चति, मुञ्चतु, अमुञ्चत्, मुञ्चेत्, मोक्ष्यति।
आ०—मुञ्चते, मुञ्चताम्, अमुञ्चत, मुञ्चेत, मोक्ष्यते। मुच्यते। (१७,५१)
मुद् (१आ०,खुश होना) मोदते, मोदताम्, अमोदत, मोदेत, मोदिष्यते। मुद्यते। (१६)
मुष् (९ प०, चुराना) मुष्णाति, मुष्णातु, अमुष्णात्, मुष्णीयात्, मोषिष्यति। मुष्यते। (७, ५५)
मुह् (४प०,मुग्ध होना) मुह्यति, मुह्यतु, अमुह्यत्, मुह्येत्, मोहिष्यति। मुह्यते। (४३)
मूर्च्छ् (१ प०, मूर्छित होना) मूर्च्छति, मूर्च्छतु, अमूर्च्छत्, मूर्च्छेत्, मूर्च्छिष्यति। मूर्च्छ्यते। (१५)
मृ (६आ०, मरना) म्रियते, म्रियताम्, अम्रियत्, म्रियेत्, मरिष्यति। म्रियते। (५०)
म्लै (१प०, मुरझाना) म्लायति, म्लायतु, अम्लायत्, म्लायेत्, म्लास्यति। म्लायते। (३१)
यज् (१ उ०, यज्ञ करना) यजति-ते, यजतु, अजयत्, यजेत्, यक्ष्यति। इज्यते। (२७)
यत् (१ आ०, यत्न करना) यतते, यतताम्, अयतत, यतेत, यतिष्यते। यत्यते। (१६)
या (२ प०, जाना) याति, यातु, अयात्, यायात्, यास्यति। यास्यते। (२९)
याच् (१ उ०, माँगना) प०—याचति, याचतु, अयाचत्, याचेत्, याचिष्यति।
आ०—याचते, याचताम्, अयाचत, याचेत, याचिष्यते। याच्यते। (७)
यापि (या + णिच्, प०, बिताना) यापयति, यापयतु, अयापयत्, यापयेत्, यापयिष्यति। याप्यते। (२९)

युज् (१० उ०, लगाना) योजयति, योजयतु, अयोजयत्; योजयेत्, योजयिष्यति। योज्यते। (३१)
युध् (४ आ०, लड़ना), युध्यते, युध्यताम्, अयुध्यत, अयुध्येत, योत्स्यते। युध्यते। (४५)
रक्ष् (१ प०, रक्षा करना), रक्षति, रक्षतु, अरक्षत्, रक्षेत्, रक्षिष्यति। रक्ष्यते। (२)
रच् (१० उ०, बनाना) रचयति-ते, रचयतु, अरचयत्, रचयेत्, रचयिष्यति। रच्यते। (३१)
रञ्ज् (४उ०, खुश होना) रज्यति-ते, रज्यतु, अरज्यत्, रज्येत्, रंक्ष्यति। रज्यते। (४२)
रम् (१ आ०, रमना) रमते, रमताम्, अरमत, रमेत, रंस्यते। रम्यते। (१६)
(वि + रम्, पर०) विरमति, विरमतु, व्यरमत्, विरमेत्, विरंस्यति। (१३)
राज् (१ उ०, चमकना) प०—राजति, राजतु, अराजत्, राजेत्, राजिष्यति।
आ०—राजते, राजताम्, अराजत, राजेत, राजिष्यति। राज्यते। (२३)
रुच् (१ आ०, अच्छा लगना) रोचते, रोचताम्, अरोचत, रोचेत, रोचिष्यते। रुच्यते। (११)
रुद् (२ प०, रोना) रोदिति, रोदितु, अरोदीत्, रुद्यात्, रोदिष्यति। रुद्यते। (२६)
रुध् (७ उ०, रोकना) प०—रुणद्धि, रुणद्धु, अरुणत्, रुन्ध्यात्, रोत्स्यति।
आ०—रुन्धे, रुन्धाम्, अरुन्ध, रुन्धीत, रोत्स्यते। रुध्यते। (७, ५२)
रुह् (१ प०, उगना) रोहति, रोहतु, अरोहत्, रोहेत्, रोक्ष्यति। रुह्यते। (७)
लङ्घ् (१ आ०, लाँघना) लङ्घते, लङ्घताम्, अलङ्घत, लङ्घेत, लङ्घिष्यते। लङ्घ्यते। (२३)
लप् (१ प०, बोलना) लपति, लपतु, अलपत्, लपेत्, लपिष्यति। लप्यते। (१४)
लभ् (१ आ०, पाना) लभते, लभताम्, अलभत, लभेत, लप्स्यते। लभ्यते (१६)
लम्ब् (१ आ०, लटकना) लम्बते, लम्बताम्, अलम्बत, लम्बेत, लम्बिष्यते। लम्ब्यते। (१९)
लष् (१ उ०, चाहना) लषति-ते, लषतु, अलषत्, लषेत्, लषिष्यति। लष्यते। (१४)
लिख् (६ प०, लिखना) लिखति, लिखतु, अलिखत्, लिखेत्, लेखिष्यति। लिख्यते। (१)
लिप् (६ उ०, लीपना) लिम्पति-ते, लिम्पतु, अलिम्पत्, लिम्पेत्, लेप्स्यति। लिप्यते। (५१)
ली (४ आ०, लीन होना) लीयते, लीयताम्, अलीयत, लीयेत, लेष्यते। लीयते। (१३)
लुप् (६ उ०, नष्ट करना) लुम्पति-ते, लुम्पतु, अलुम्पत्, लुम्पेत्, लोप्स्यति। लुप्यते। (५१)
लुभ् (४ प०, लोभ करना) लुभ्यति, लुभ्यतु, अलुभ्यत्, लुभ्येत्, लोभिष्यति। लुभ्यते। (४४)
[लोक्यते। (३२)
लोक् (१० उ०, देखना) लोकयति-ते, लोकयतु, अलोकयत्, लोकयेत्, लोकयिष्यति।
लोच् (१० उ०, देखना) लोचयति-ते, लोचयतु, अलोचयत्, लोचयेत्, लोचयिष्यति। लोच्यते। (३२)
वद् (१ प०, बोलना) वदति, वदतु, अवदत्, वदेत्, वदिष्यति। उद्यते। (२)
वन्द् (१ आ०, प्रणाम करना) वन्दते, वंदताम्, अवन्दत, वन्देत, वन्दिष्यते। वन्द्यते। (१६)

वप् (१ उ०, बोना) वपति-ते, वपतु, अवपत्, वपेत्, वप्स्यति। उप्यते। (२७, ४९)
वस् (१ प०, रहना) वसति, वसतु, अवसत्, वसेत्, वत्स्यति। उष्यते। (७)
वह् (१ उ०, ढोना) वहति-ते, वहतु, अवहत्, वहेत्, वक्ष्यति। उह्यते। (७)
वा (२ प०, हवा चलना) वाति, वातु, अवात्, वायात्, वास्यति। वायते। (२९)
विद् (२ प०, जानना) वेत्ति, वेत्तु, अवेत्, विद्यात्, वेदिष्यति। विद्यते। (२९)
विद् (४ आ०, होना) विद्यते, विद्यताम्, अविद्यत, विद्येत, वेत्स्यते। विद्यते। (४६)
विद् (६ उ०, पाना) विन्दति-ते, विन्दतु, अविन्दत्, विन्देत्, वेदिष्यति। विद्यते। (५१)
विद् (१० आ, कहना) वेदयते, वेदयताम्, अवेदयत, वेदयेत, वेदयिष्यते। वेद्यते। (११)
विश् (६ प०, घुसना) विशति, विशतु, अविशत्, विशेत्, वेक्ष्यति। विश्यते। (२८)
वृ (५ उ०, चुनना) वृणोति, वृणोतु, अवृणोत्, वृणुयात्, वरिष्यति। व्रियते। (२७)
वृत् (१ आ०, होना) वर्तते, वर्तताम्, अवर्तत, वर्तेत, वर्तिष्यते। वृत्यते। (१६)
वृध् (१ आ०, बढ़ना) वर्धते, वर्धताम्, अवर्धत, वर्धेत, वर्धिष्यते। वृध्यते (१६)
वृष् (१ प०, बरसना) वर्षति, वर्षतु, अवर्षत्, वर्षेत्, वर्षिष्यति। वृष्यते। (८)
वे (१ उ०, बुनना) वयति-ते, वयतु, अवयत्, वयेत्, वास्यति। ऊयते। (१५)
वेप् (१ आ०, काँपना) वेपते, वेपताम्, अवेपत, वेपेत, वेपिष्यते। वेप्यते। (१८)
व्यथ् (१ आ०, दुःखित होना) व्यथते, व्यथताम्, अव्यथत, व्यथेत, व्यथिष्यते। व्यथ्यते। (१९)
व्यध् (४ प०, बींधना) विध्यति, विध्यतु, अविध्यत्, विध्येत्, व्यत्स्यति। विध्यते। (४२)
शक् (५ प०, सकना) शक्नोति, शक्नोतु, अशक्नोत्, शक्नुयात्, शक्ष्यति। शक्यते। (४९)
शंक् (१ आ०, शंका करना) शंकते, शंकताम्, अशंकत, शंकेत, शंकिष्यते। शंक्यते। (१९)
शप् (१ उ०, शाप देना) शपति-ते, शपतु, अशपत्, शपेत्, शप्स्यति। शप्यते। (२७)
शम् (४ प०, शान्त होना) शाम्यति, शाम्यतु, अशाम्यत्, शाम्येत्, शमिष्यति। शम्यते। (२९, ४४)
शास् (२ प०, शिक्षा देना) शास्ति, शास्तु, अशात्, शिष्यात्, शासिष्यति। शिष्यते। (७)
शिक्ष् (१ आ०, सीखना) शिक्षते, शिक्षताम्, अशिक्षत, शिक्षेत, शिक्षिष्यते। शिक्ष्यते। (१६)
शी (२ आ०, सोना) शेते, शेताम्, अशेत, शयीत, शयिष्यते। शय्यते। (६, ३७)
शुच् (१ प०, शोक करना) शोचति, शोचतु, अशोचत्, शोचेत, शोचिष्यति। शुच्यते। (१४)
शुध् (४ प०, शुद्ध होना) शुध्यति, शुध्यतु, अशुध्यत्, शुध्येत्, शोत्स्यति। शुध्यते। (४२)
शुभ् (१ आ०, अच्छा लगना) शोभते, शोभताम्, अशोभत, शोभेत, शोभिष्यते। शुभ्यते। (१६)
शुष् (४ प०, सूखना) शुष्यति, शुष्यतु, अशुष्यत्, शुष्येत्, शोक्ष्यति। शुष्यते। (४२)
शॄ (९ प०, नष्ट करना) शृणाति, शृणातु, अशृणात्, शृणीयात्, शरिष्यति। शीर्यते (२७)
श्रि (१ उ०, आश्रय लेना) श्रयति-ते, श्रयतु, अश्रयत्, श्रयेत्, श्रयिष्यति। श्रीयते। (१५)

श्रु (१ प०, सुनना) शृणोति, शृणोतु, अशृणोत्, शृणुयात्, श्रोष्यति। श्रूयते। (२८, ४९)

श्लिष् (४ प०, आलिंगन करना) श्लिष्यति, श्लिष्यतु, अश्लिष्यत्, श्लिष्येत्, श्लेषिष्यति। श्लिष्यते। (३१, ४२)

श्वस् (२ प०, साँस लेना) श्वसिति, श्वसितु, अश्वसीत्, श्वस्यात्, श्वसिष्यति। श्वस्यते (१७)

सद् (१ प०, बैठना) सीदति, सीदतु, असीदत्, सीदेत्, सत्स्यति। सद्यते। (३)

सह् (१ आ०, सहना) सहते, सहताम्, असहत, सहेत, सहिष्यते। सह्यते। (१६)

सान्त्व् (१० उ०, धैर्य बँधाना) सान्त्वयति, सान्त्वयतु, असान्त्वयत्, सान्त्वयेत्, सान्त्वयिष्यति। सान्त्व्यते। (३२) (५१)

सिच् (६ उ०, सींचना) सिंचति-ते, सिंचतु, असिंचत्, सिंचेत्, सेक्ष्यति। सिच्यते। (४१)

सिव् (४प०, सीना) सीव्यति, सीव्यतु, असीव्यत्, सीव्येत्, सेविष्यति। सीव्यते। (४१)

सु (५ उ०, निचोड़ना) प०—सुनोति, सुनोतु, असुनोत्, सुनुयात्, सोष्यति।

आ०—सुनुते, सुनुताम्, असुनुत, सुन्वीत, सोष्यते। सूयते। (४७)

सृ (१ प०, चलना) सरति, सरतु, असरत्, सरेत्, सरिष्यति। स्रियते। (१५)

सृज् (६ प०, बनाना) सृजति, सृजतु, असृजत्, सृजेत्, स्रक्ष्यति। सृज्यते। (५०)

सेव् (१ आ०, सेवा करना) सेवते, सेवताम्, असेवत, सेवेत, सेविष्यते। सेव्यते। (१६)

सो (४ प०, नष्ट होना) स्यति, स्यतु, अस्यत्, स्येत्, सास्यति। सीयते। (२७)

स्तु (२ उ०, स्तुति करना) स्तौति, स्तौतु, अस्तौत्, स्तुयात्, स्तोष्यति। स्तूयते। (२७)

स्था (१ प०, रुकना) तिष्ठति, तिष्ठतु, अतिष्ठत्, तिष्ठेत्, स्थास्यति। स्थीयते। (३, ६)

स्ना (२ प०, नहाना) स्नाति, स्नातु, अस्नात्, स्नायात्, स्नास्यति। स्नायते। (२९)

स्निह् (४ प०, स्नेह करना) स्निह्यति, स्निह्यतु, अस्निह्यत्, स्निह्येत्, स्नेहिष्यति। स्निह्यते। (१७)

स्पन्द् (१ आ०, हिलना) स्पन्दते, स्पन्दताम्, अस्पन्दत, स्पन्देत, स्पन्दिष्यते। स्पन्द्यते। (२४) (१८)

स्पर्ध् (१आ०, स्पर्धा करना) स्पर्धते, स्पर्धताम्, अस्पर्धत, स्पर्धेत, स्पर्धिष्यते। स्पर्ध्यते। (५)

स्पृश् (६ प०, छूना) स्पृशति, स्पृशतु, अस्पृशत्, स्पृशेत्, स्पर्क्ष्यति। स्पृश्यते। (५)

स्पृह् (१० उ०, चाहना) स्पृहयति, स्पृहयतु, अस्पृहयत्, स्पृहयेत्, स्पृहयिष्यति। स्पृह्यते। (११)

स्मृ (१ प०, सोचना) स्मरति, स्मरतु, अस्मरत्, स्मरेत्, स्मरिष्यति। स्मर्यते। (३)

स्रंस् (१ आ०, गिरना) स्रंसते, स्रंसताम्, अस्रंसत, स्रंसेत, स्रंसिष्यते। स्रस्यते। (१९)

स्वाद् (१० उ०, स्वाद लेना) आ +, आस्वादयति, आस्वादयतु, आस्वादयत्, आस्वादयेत्, आस्वादयिष्यति। आस्वाद्यते। (३३)

स्वप् (२ प०, सोना) स्वपिति, स्वपितु, अस्वपत्, स्वप्यात्, स्वप्स्यति। सुप्यते। (२८)
हन् (२ प०, मारना) हन्ति, हन्तु, अहन्, हन्यात्, हनिष्यति। हन्यते। (२९)
हस् (१ प०, हसना) हसति, हसतु, अहसत्, हसेत्, हसिष्यति। हस्यते। (१)
हा (३ प०, छोड़ना) जहाति, जहातु, अजहात्, जह्यात्, हास्यति। हीयते। (२७)
हु (३ प०, यज्ञ करना) जुहोति, जुहोतु, अजुहोत्, जुहुयात्, होष्यति। हूयते। (२७)
हृ (१ उ०, ले जाना, चुराना) प०—हरति, हरतु, अहरत्, हरेत्, हरिष्यति।
आ०—हरते, हरताम्, अहरत, हरेत, हरिष्यते। ह्रियते। (७, २१)
हृष् (४ प०, खुश होना) हृष्यति, हृष्यतु, अहृष्यत्, हृष्येत्, हर्षिष्यति। हृष्यते। (४४)
ह्वे (१ उ०, बुलाना) आ +, आह्वयति, आह्वयतु, आह्वयत्, आह्वयेत्, आह्वयिष्यति। आहूयते (१४)

(१) अकर्मक धातुएँ

लज्जासत्तास्थितिजागरणं, वृद्धिक्षयभयजीवतिमरणम्।
शयनक्रीडारुचिदीप्त्यर्थं, धातुगणं तमकर्मकमाहुः॥

इन अर्थोंवाली धातुएँ साधारणतया अकर्मक (कर्मरहित) होती हैं—लज्जा, होना, रुकना या बैठना, जागना, बढ़ना, घटना, डरना, जीना, मरना, सोना, खेलना, अच्छा लगना, चमकना।

(२) अनिट् धातुएँ (जिनमें बीच में इ नहीं लगता)

ऊ ऋदन्त औ' शी श्रि डी को छोड़कर एकाच् सब।
शक् पच् वच मुच् सिच् प्रच्छ् त्यज् भज्, भुज यज् सृज् मस्ज युज॥
अद् पद्य खिद् छिद् विद्य तुद् नुद्, भिद् सद क्रुध् क्षुध् बुध।
बन्ध् युध् रुध् साध् व्यध् शुध्, सिध् मन्य हन् क्षिप् आप तप॥१॥
तृप्य दृप् लिप् लुप् वप स्वप्, शप् सृप रभ् लभ् गम।
नम् यम् रम क्रुश् दंश् दिश् दृश्, मृश् विश स्पृश् पुष्य दुष॥
कृष् तुष् द्विष् श्लिष शुष्य शिष् वस्, दह् लिह औ' रूह वह।
धातु ये सब अनिट् हैं, परिगणन इनका है यह॥२॥

सूचना—अन्त्याक्षरों के क्रम से ये धातुएँ पद्यबद्ध हैं। दिवादिगणी धातुओं में, इस प्रकार की अन्य धातुओं से अन्तर के लिए, अन्त में य लगा है। पहले क् अन्तवाली शक् धातु, बाद में च् अन्तवाली, इसी प्रकार क्रमशः धातुएँ हैं। अजन्त धातुओं में ऊकारान्त और दीर्घ ऋकारान्त तथा शी श्रि डी धातु सेट् हैं, शेष अनिट् हैं। जैसे चि, जि, कृ, हृ, भृ आदि। केवल विशेष प्रचलित धातुओं का ही संग्रह है। अप्रचलित ३० धातुओं का संग्रह नहीं है।

(५) प्रत्यय-विचार

(१) क्त, (२) क्तवतु प्रत्यय (देखो अभ्यास ३१, ३२, ३३)

सूचना—क्त और क्तवतु प्रत्यय भूतकाल में होते हैं। क्त का त और क्तवतु का तवत् शेष रहता है। क्त कर्मवाच्य या भाववाच्य में होता है, क्तवतु कर्तृवाच्य में। धातु को गुण या वृद्धि नहीं होती है। संप्रसारण होता है। अन्य नियमों के लिए देखो अभ्यास ३१-३३। क्त-प्रत्यान्त के रूप पुंलिंग में रामवत्, स्त्रीलिंग में आ लगाकर रमावत् और नपुंसकलिंग में गृहवत् चलेंगे। यहाँ केवल पुंलिंग के ही रूप दिये गये हैं। क्त-प्रत्ययान्त का क्तवतु-प्रत्ययान्त रूप बनाने का सरल प्रकार यह है कि क्त-प्रत्ययान्त के बाद में 'वत्' और जोड़ दो। अभ्यास ३३ में दिए नियमानुसार तीनों लिंगों में रूप चलाओ। धातुएँ अकारादिक्रम से दी गई हैं।

धातु	रूप	धातु	रूप	धातु	रूप	धातु	रूप
अद्	जग्धः (अन्नम्)	कृष्	कृष्टः	घ्रा	घ्रातः, घ्राणः	त्यज्	त्यक्तः
अधि + इ	अधीतः	कॄ	कीर्णः	चर्	चरितः	त्रै	त्रातः
अर्च्	अर्चितः	क्रन्द्	क्रन्दितः	चल्	चलितः	दंश्	दष्टः
अस् (२ प.)	भूतः	क्रम्	क्रान्तः	चि	चितः	दण्ड्	दण्डितः
आप्	आप्तः	क्री	क्रीतः	चिन्त्	चिन्तितः	दम्	दान्तः
आ + रभ्	आरब्धः	क्रीड्	क्रीडितः	चुर्	चोरितः	दय्	दयितः
आलम्ब्	आलम्बितः	क्रुध्	क्रुद्धः	चेष्ट्	चेष्टितः	दह्	दग्धः
आ ह्वे	आहूतः	क्षि	क्षीणः	छिद्	छिन्नः	दा	दत्तः
इ	इतः	क्षिप्	क्षिप्तः	जन्	जातः	दिव्	द्यूनः, द्यूतः
इष्	इष्टः	क्षुभ्	क्षुब्धः	जि	जितः	दिश्	दिष्टः
ईक्ष्	ईक्षितः	खन्	खातः	जीव्	जीवितः	दीप्	दीप्तः
उत् + डी	उड्डीनः	खाद्	खादितः	जॄ	जीर्णः	दुह्	दुग्धः
कथ्	कथितः	गण्	गणितः	ज्ञा	ज्ञातः	दृश्	दृष्टः
कम्	कान्तः	गम्	गतः	ज्वल्	ज्वलितः	दो (दा)	दितः
कम्प्	कम्पितः	गर्ज्	गर्जितः	तन्	ततः	द्युत्	द्योतितः
कुप्	कुपितः	गॄ	गीर्णः	तप्	तप्तः	धा	हितः
कूर्द्	कूर्दितः	गै (गा)	गीतः	तुष्	तुष्टः	धाव्	धावितः
कृ	कृतः	ग्रस	ग्रस्तः	तृप्	तृप्तः	धृ	धृतः
		ग्रह्	गृहीतः			ध्मा	ध्मातः

ध्यै	ध्यातः	भुज्	भुक्तः	लिख्	लिखितः	श्रु	श्रुतः
ध्वंस्	ध्वस्तः	भू	भूतः	लिह्	लीढः	श्लिष्	श्लिष्टः
नम्	नतः	भृ	भृतः	लुभ्	लुब्धः	सद्	सन्नः
नश्	नष्टः	भ्रम्	भ्रान्तः	वच् (ब्रू)	उक्तः	सन्	सातः
निन्द्	निन्दितः	मद्	मत्तः	वद्	उदितः	सह्	सोढः
नी	नीतः	मन्	मतः	वन्द्	वन्दितः	साध्	साधितः
नृत्	नृत्तः	मन्थ्	मन्थितः	वप्	उप्तः	सिच्	सिक्तः
पच्	पक्वः	मा	मितः	वस्	उषितः	सिध्	सिद्धः
पठ्	पठितः	मिल्	मिलितः	वह्	ऊढः	सिव्	स्यूतः
पत्	पतितः	मुच्	मुक्तः	वा	वातः	सृज्	सृष्टः
पद्	पन्नः	मुद्	मुदितः	वि + कस्	विकसितः	सेव्	सेवितः
पलाय्	पलायितः	मुह	मुग्धः, मूढः	विद् (२प)	विदितः	सो (सा)	सितः
पा (१प.)	पीतः	मूर्च्छ्	मूर्च्छितः	विद् (१०)	वेदितः	स्तु	स्तुतः
पाल्	पालितः	मृज्	मृष्टः	विश्	विष्टः	स्था	स्थितः
पुष्	पुष्टः	यज्	इष्टः	वृत्	वृत्तः	स्ना	स्नातः
पूज्	पूजितः	यत्	यतितः	वृध्	वृद्धः	स्निह्	स्निग्धः
पॄ	पूर्णः	यम्	यतः	वे	उतः	स्पृश्	स्पृष्टः
प्रच्छ्	पृष्टः	या	यातः	व्यथ्	व्यथितः	स्वप्	सुप्तः
प्रथ्	प्रथितः	याच्	याचितः	व्यध्	विद्धः	स्वाद्	स्वादितः
प्र + हि	प्रहितः	युज्	युक्तः	शक्	शक्तः	स्विद्	स्विन्नः
प्रेर्	प्रेरितः	युध्	युद्धः	शङ्क्	शङ्कितः	हन्	हतः
बन्ध्	बद्धः	रक्ष्	रक्षितः	शप्	शप्तः	हस्	हसितः
बुध्	बुद्धः	रच्	रचितः	शम्	शान्तः	हा (३ प.)	हीनः
ब्रू	उक्तः	रञ्ज्	रक्तः	शास्	शिष्टः	हा (३आ.)	हानः
भक्ष्	भक्षितः	रम	रतः	शिक्ष्	शिक्षितः	हिंस्	हिंसितः
भज्	भक्तः	रुच्	रुचितः	शी	शयितः	हु	हुतः
भञ्ज्	भग्नः	रुद्	रुदितः	शुच्	शुचितः	हृ	हृतः
भण्	भणितः	रुध्	रुद्धः	शुभ्	शोभितः	हृष्	हृष्टः
भाष्	भाषितः	रुह्	रूढः	शुष्	शुष्कः	ह्रस्	ह्रसितः
भिद्	भिन्नः	लभ्	लब्धः	शॄ	शीर्णः	ह्री	ह्रीतः, ह्रीणः
भी	भीतः	लष	लषितः	श्रि	श्रितः	ह्वे	हूतः

(३) शतृ प्रत्यय (देखो अभ्यास ३४)

सूचना—परस्मैपदी धातुओं को लट् के स्थान पर शतृ होता है। शतृ का अत् शेष रहता है। पुंलिंग में पठत् के तुल्य, स्त्रीलिंग में ई लगाकर नदी के तुल्य और नपुंसकलिंग में जगत् के तुल्य रूप चलेंगे। यहाँ पर केवल पुंलिंग के रूप दिए हैं। रूप बनाने के नियमों के लिए देखो अभ्यास ३४। **धातुएँ अकारादिक्रम से दी गई हैं।**

अद्	अदन्	चल्	चलन्	पत्	पतन्	व्यध्	विध्यन्
अर्च	अर्चन्	चि	चिन्वन्	पा (१ प०)	पिबन्	शक्	शक्नुवन्
अस् (२प.)	सन्	छिद्	छिन्दन्	पाल्	पालयन्	शप्	शपन्
आप्	आप्नुवन्	जप्	जपन्	पूज्	पूजयन्	शम्	शाम्यन्
आ + रुह्	आरोहन्	जि	जयन्	प्रच्छ्	पृच्छन्	शुष्	शुष्यन्
आ + ह्वे	आह्वयन्	जीव्	जीवन्	प्रेर्	प्रेरयन्	श्रि	श्रयन्
इ	यन्	ज्वल्	ज्वलन्	बन्ध्	बध्नम्	श्रु	शृण्वन्
इष्	इच्छन्	तप्	तपन्	भक्ष्	भक्षयन्	सद्	सीदन्
कुप्	कुप्यन्	तुद्	तुदन्	भज्	भजन्	सिच्	सिञ्चन्
कृष्	कर्षन्	तुष्	तुष्यन्	भिद्	भिन्दन्	सिव्	सीव्यन्
कॄ	किरन्	तॄ	तरन्	भृ	भरन्	सृ	सरन्
क्रन्द्	क्रन्दन्	त्यज्	त्यजन्	भू	भवन्	सृज्	सृजन्
क्रम्	क्राम्यन्	दण्ड्	दण्डयन्	भ्रम्	भ्रमन्, भ्राम्यन्	सृप्	सर्पन्
क्रीड्	क्रीडन्	दह्	दहन्	मिल्	मिलन्	स्तु	स्तुवन्
क्रुध्	क्रुध्यन्	दिव्	दीव्यन्	रक्ष्	रक्षन्	स्था	तिष्ठन्
क्षम्	क्षाम्यन्	दिश्	दिशन्	रच्	रचयन्	स्पृश्	स्पृशन्
क्षिप्	क्षिपन्	दुह्	दुहन्	रुद्	रुदन्	स्मृ	स्मरन्
खन्	खनन्	दृश्	पश्यन्	लष्	लषन्	स्वप्	स्वपन्
खाद्	खादन्	धाव्	धावन्	लिख्	लिखन्	हन्	घ्नन्
गण्	गणयन्	धृ	धरन्	लिह्	लिहन्	हस्	हसन्
गम्	गच्छन्	ध्यै	ध्यायन्	वद्	वदन्	हा (३ प०)	जहन्
गर्ज्	गर्जन्	नम्	नमन्	वस्	वसन्	हिंस्	हिंसन्
गॄ	गिरन्	नश्	नश्यन्	वह्	वहन्	हु	जुह्वन्
गै	गायन्	निन्द्	निन्दन्	विश्	विशन्	हृ	हरन्
घ्रा	जिघ्रन्	नृत्	नृत्यन्	वृष्	वर्षन्	हृष्	हृष्यन्
चर्	चरन्	पठ्	पठन्			ह्वे	ह्वयन्

(४) शानच् प्रत्यय (देखो अभ्यास ३५)

सूचना—आत्मनेपदी धातुओं के लट् के स्थान पर शानच् होता है। उभयपदी धातुओं के लट् के स्थान पर शतृ और शानच् दोनों होते हैं। शानच् का आन शेष रहता है। शानच्-प्रत्ययान्त के रूप पुं० में रामवत्, स्त्री० में आ लगाकर रमावत् और नपुं० में गृहवत् चलेंगे। यहाँ पर पुंलिंग के ही रूप दिए गए हैं। **धातुएँ अकारादि-क्रम से दी गई हैं।**

आत्मनेपदी धातुएँ **उभयपदी धातुएँ**

अधि + इ	अधीयानः	मन्	मन्यमानः	कथ्	कथयन्	कथयमानः
आ + रभ्	आरभमाणः	मुद्	मोदमानः	कृ	कुर्वन्	कुर्वाणः
आ + लम्ब्	आलम्बमानः	मृ	म्रियमाणः	क्री	क्रीणन्	क्रीणानः
आस्	आसीनः	यत्	यतमानः	ग्रह्	गृह्णन्	गृह्णानः
ईक्ष्	ईक्षमाणः	याच्	याचमानः	चि	चिन्वन्	चिन्वानः
ईह्	ईहमानः	युध्	युध्यमानः	चिन्त्	चिन्तयन्	चिन्तयमानः
उद् + डी	उड्डयमानः	रुच्	रोचमानः	चुर्	चोरयन्	चोरयमाणः
कम्प्	कम्पमानः	लभ्	लभमानः	ज्ञा	जानन्	जानानः
कूर्द्	कूर्दमानः	वन्द्	वन्दमानः	तन्	तन्वन्	तन्वानः
गाह्	गाहमानः	वि + राज्	विराजमानः	दा	ददत्	ददानः
ग्रस्	ग्रसमानः	वृत्	वर्तमानः	धा	दधत्	दधानः
चेष्ट्	चेष्टमानः	वृध्	वर्धमानः	नी	नयन्	नयमानः
जन्	जायमानः	व्यथ्	व्यथमानः	पच्	पचन्	पचमानः
त्रै	त्रायमाणः	शङ्क्	शङ्कमानः	ब्रू	ब्रुवन्	ब्रुवाणः
त्वर्	त्वरमाणः	शिक्ष्	शिक्षमाणः	भुज्	भुञ्जन्	भुञ्जानः
दय्	दयमानः	शी	शयानः	मुच्	मुञ्चन्	मुञ्चमानः
द्युत्	द्योतमानः	शुच्	शोचमानः	यज्	यजन्	यजमानः
ध्वंस्	ध्वंसमानः	शुभ्	शोभमानः	युज्	युञ्जन्	युञ्जानः
पलाय्	पलायमानः	श्लाघ्	श्लाघमानः	रुध्	रुन्धन्	रुन्धानः
प्रथ्	प्रथमानः	सं + पद्	संपद्यमानः	वह्	वहन्	वहमानः
बाध्	बाधमानः	सह्	सहमानः	श्रि	श्रयन्	श्रयमाणः
भास्	भासमानः	सेव्	सेवमानः	सु	सुन्वन्	सुन्वानः
भिक्ष्	भिक्षमाणः	स्मि	स्मयमानः	हृ	हरन्	हरमाणः

(५) तुमुन्, (६) तव्यत् , (७) तृच् प्रत्यय (देखो अभ्यास ३६, ३९, ४२)

सूचना—(क) तुमुन् प्रत्यय 'को', 'के लिए' अर्थ में होता है । तुमुन् का तुम् शेष रहता है । तुमुन्-प्रत्ययान्त अव्यय होता है, अतः रूप नहीं चलते। धातु को गुण होता है। विशेष नियमों के लिए देखो अभ्यास ३६ । (ख) तव्यत् प्रत्यय लगाकर रूप बनानेका सरल उपाय यह है कि तुम्-प्रत्यय वाले रूप में तुम् के स्थान पर तव्य लगा दो । तव्यत् प्रत्यय 'चाहिए' अर्थ में होता है । तव्यत् का तव्य शेष रहता है । पुं० में तव्य-प्रत्ययान्त के रूप रामवत् , स्त्री० में आ लगाकर रमावत् , नपुं० में गृहवत् चलेंगे। विशेष नियमों के लिए देखो अभ्यास ३९। (ग) तृच् प्रत्यय कर्ता या 'वाला' अर्थ में होता है। तृच् का तृ शेष रहता है । तृच् प्रत्यय लगाकर रूप बनाने का सरल उपाय यह है कि तुम् प्रत्यय वाले रूप में तुम् के स्थान पर तृ लगा दो। तृच्-प्रत्ययान्त के रूप पुं० में कर्तृ के तुल्य, स्त्री० में ई लगाकर नदी के तुल्य और नपुं० में कर्तृ के तुल्य चलेंगे। तृच् प्रत्यय के विशेष नियमों के लिए देखो अभ्यास ४२ । उदाहरणार्थ—तुम् , तव्य, तृ लगाकर इन धातुओं के ये रूप होंगे। कृ—कर्तुम् , कर्तव्य, कर्तृ । हृ—हर्तुम, हर्तव्य, हर्तृ। लिख्—लेखितुम्, लेखितव्य, लेखितृ । तव्य और तृच् में तुम् के तुल्य ही सन्धि के कार्य होंगे। **धातुएँ अकारादिक्रम से दी गयी हैं।**

अद्	अत्तुम्	ईक्ष्	ईक्षितुम्	क्री	क्रेतुम्	ग्रस्	ग्रसितुम्
अधि + इ	अध्येतुम्	कथ्	कथयितुम्	क्रीड्	क्रीडितुम्	ग्रह्	ग्रहीतुम्
अर्च्	अर्चितुम्	कम्	कमितुम्	क्रुध्	क्रोद्धुम्	घ्रा	घ्रातुम्
अस् (२ प.)	भवितुम्	कम्प्	कम्पितुम्	क्षम्	क्षमितुम्	चर्	चरितुम्
आप्	आप्तुम्	कुप्	कोपितुम्	क्षिप्	क्षेप्तुम्	चल्	चलितुम्
आ + रभ्	आरब्धुम्	कूर्द	कूर्दितुम्	खन्	खनितुम्	चि	चेतुम्
आ + रुह्	आरोढुम्	कृ	कर्तुम्	खाद्	खादितुम्	चिन्त्	चिन्तयितुम्
आ + लप्	आलपितुम्	क्लृप्	कल्पितुम्	गण्	गणयितुम्	चुर्	चोरयितुम्
आस्	आसितुम्	कृष्	कर्ष्टुम्	गम्	गन्तुम्	चेष्ट्	चेष्टितुम्
आ + ह्वे	आह्वातुम्	कॄ	करितुम्	गर्ज्	गर्जितुम्	छिद्	छेत्तुम्
इ	एतुम्	क्रन्द्	क्रन्दितुम्	गॄ	गरितुम्	जन्	जनितुम्
इष्	एषितुम्	क्रम्	क्रमितुम्	गै	गातुम्	जप्	जपितुम्

जि	जेतुम्
जीव्	जीवितुम्
ज्ञा	ज्ञातुम्
ज्वल्	ज्वलितुम्
डी	डयितुम्
तप्	तप्तुम्
तृप्	तर्पितुम्
तॄ	तरितुम्
त्यज्	त्यक्तुम्
त्रै	त्रातुम्
दंश्	दंष्टुम्
दह्	दग्धुम्
दा	दातुम्
दिश्	देष्टुम्
दीक्ष्	दीक्षितुम्
दुह्	दोग्धुम्
द्युत्	द्योतितुम्
द्रुह्	द्रोग्धुम्
धा	धातुम्
धाव्	धावितुम्
धृ	धर्तुम्
ध्यै	ध्यातुम्
ध्वंस्	ध्वंसितुम्
नम्	नन्तुम्
नश्	नंष्टुम्
निन्द्	निन्दितुम्
नी	नेतुम्
नृत्	नर्तितुम्
पच्	पक्तुम्
पठ्	पठितुम्
पत्	पतितुम्
पद्	पत्तुम्
पलाय्	पलायितुम्
पा (१, २)	पातुम्
पाल्	पालयितुम्
पुष्	पोषितुम्
पूज्	पूजयितुम्
प्रच्छ्	प्रष्टुम्
प्रेर्	प्रेरयितुम्
बन्ध्	बन्धुम्
बाध्	बाधितुम्
बुध्	बोद्धुम्
ब्रू	वक्तुम्
भक्ष्	भक्षयितुम्
भज्	भक्तुम्
भाष्	भाषितुम्
भिद्	भेत्तुम्
भी	भेतुम्
भुज्	भोक्तुम्
भू	भवितुम्
भृ	भर्तुम्
भ्रम्	भ्रमितुम्
मन्	मन्तुम्
मा	मातुम्
मिल्	मेलितुम्
मुच्	मोक्तुम्
मुद्	मोदितुम्
मृ	मर्तुम्
यंज्	यष्टुम्
यत्	यतितुम्
यम्	यन्तुम्
या	यातुम्
याच्	याचितुम्
युज्	योक्तुम्
युध्	योद्धुम्
रक्ष्	रक्षितुम्
रच्	रचयितुम्
रम्	रन्तुम्
राज्	राजितुम्
रुच्	रोचितुम्
रुद्	रोदितुम्
रुध्	रोद्धुम्
लभ्	लब्धुम्
लम्ब्	लम्बितुम्
लष्	लषितुम्
लिख्	लेखितुम्
लिह्	लेढुम्
लुभ्	लोभितुम्
वच्	वक्तुम्
वद्	वदितुम्
वन्द्	वन्दितुम्
वप्	वप्तुम्
वस्	वस्तुम्
वह्	वोढुम्
विद् (४, ६, ७)	वेत्तुम्
विश्	वेष्टुम्
वृ (१०)	वारयितुम्
वृत्	वर्तितुम्
वृध्	वर्धितुम्
वृष्	वर्षितुम्
वे	वातुम्
शक्	शक्तुम्
शंक्	शंकितुम्
शप्	शप्तुम्
शम्	शमितुम्
शिक्ष्	शिक्षितुम्
शी	शयितुम्
शुच्	शोचितुम्
शुभ्	शोभितुम
श्रि	श्रयितुम्
श्रु	श्रोतुम्
श्लिष्	श्लेष्टुम्
सह्	सोढुम्
सिच्	सेक्तुम्
सिध्	सेद्धुम्
सिव्	सेवितुम्
सु	सोतुम्
सृ	सर्तुम्
सृज्	स्रष्टुम्
सृप्	सर्प्तुम्
सेव्	सेवितुम्
स्तु	स्तोतुम्
स्था	स्थातुम्
स्ना	स्नातुम्
स्पर्ध्	स्पर्धितुम्
स्पृश्	स्प्रष्टुम्
स्मृ	स्मर्तुम्
हन्	हन्तुम्
हस्	हसितुम्
हा	हातुम्
हिंस्	हिंसितुम्
हु	होतुम्
हृ	हर्तुम्
हृष्	हर्षितुम्

(८) क्त्वा, (९) ल्यप् प्रत्यय (देखो अभ्यास ३७, ३८)

सूचना—'कर' या 'करके' अर्थ में क्त्वा और ल्यप् प्रत्यय होते हैं। क्त्वा का त्वा और ल्यप् का य शेष रहता है। धातु से पहले उपसर्ग नहीं होगा तो क्त्वा होगा। यदि उपसर्ग पहले होगा तो ल्यप् होगा। दोनों प्रत्ययान्त शब्द अव्यय होते हैं, अतः इनके रूप नहीं चलते। दोनों प्रत्यय लगाकर रूप बनाने के नियमों के लिए देखो अभ्यास ३७ और ३८। जिन उपसर्गों के साथ ल्यप् रूप वाला अधिक प्रचलित है, वही यहाँ दिए गए हैं। **धातुएँ अकारादिक्रम से दी गयी हैं।**

अद्	जग्ध्वा	प्रजग्ध्य
अधि इ	——	अधीत्य
अर्च्	अर्चित्वा	समर्च्य
अस् (२प०)	भूत्वा	सम्भूय
अस् (४प०)	असित्वा	प्रास्य
आ + दृ-	——	आदृत्य
आप्	आप्त्वा	प्राप्य
आस्	आसित्वा	उपास्य
इ	इत्वा	प्रेत्य
इष्	इष्ट्वा	समिष्य
ईक्ष्	ईक्षित्वा	समीक्ष्य
उत् + डी	—	उड्डीय
कम्	कमित्वा	संकाम्य
कूर्द्	कूर्दित्वा	प्रकूर्द्य
कृ	कृत्वा	उपकृत्य
कृष्	कृष्ट्वा	आकृष्य
कॄ	कीर्त्वा	विकीर्य
क्रन्द्	क्रन्दित्वा	आक्रन्द्य
क्रम्	क्रमित्वा, क्रान्त्वा	संक्रम्य
क्री	क्रीत्वा	विक्रीय
क्रीड्	क्रीडित्वा	प्रक्रीड्य
क्रुध्	क्रुद्ध्वा	संक्रुध्य
क्षम्	क्षमित्वा	संक्षम्य
क्षिप्	क्षिप्त्वा	प्रक्षिप्य
क्षुभ्	क्षुभित्वा	प्रक्षुभ्य
खन्	खनित्वा, खात्वा	उत्खाय
गण्	गणयित्वा	विगणय्य
गम्	गत्वा	आगम्य, आगत्य
गॄ	गीर्त्वा	उद्गीर्य
गै	गीत्वा	प्रगाय
ग्रस्	ग्रसित्वा	संग्रस्य
ग्रह्	गृहीत्वा	संगृह्य
घ्रा	घ्रात्वा	आघ्राय
चर्	चरित्वा	आचर्य
चल्	चलित्वा	प्रचल्य
चि	चित्वा	संचित्य
चिन्त्	चिन्तयित्वा	संचिन्त्य
चुर्	चोरयित्वा	संचोर्य
छिद्	छित्वा	उच्छिद्य
जन्	जनित्वा	संजाय
जप्	जपित्वा	संजप्य
जि	जित्वा	विजित्य
जीव्	जीवित्वा	संजीव्य

ज्ञा	ज्ञात्वा	विज्ञाय	पलाय्	——	पलाय्य
ज्वल्	ज्वलित्वा	प्रज्वल्य	पा (१ प.)	पीत्वा	निपाय
तन्	तनित्वा	वितत्य	पाल्	पालयित्वा	संपाल्य
तप्	तप्त्वा	संतप्य	पुष्	पुष्ट्वा	संपुष्य
तुष्	तुष्ट्वा	संतुष्य	पूज्	पूजयित्वा	संपूज्य
तॄ	तीर्त्वा	उत्तीर्य	पॄ	पूर्त्वा	आपूर्य
त्यज्	त्यक्त्वा	परित्यज्य	प्रच्छ्	पृष्ट्वा	संपृच्छ्य
दंश्	दष्ट्वा	संदश्य	बन्ध्	बद्ध्वा	आबध्य
दह्	दग्ध्वा	संदह्य	बुध्	बुद्ध्वा	प्रबुध्य
दा	दत्त्वा	आदाय	ब्रू	उक्त्वा	प्रोच्य
दिव्	देवित्वा	संदीव्य	भक्ष्	भक्षयित्वा	संभक्ष्य
दिश्	दिष्ट्वा	उपदिश्य	भज्	भक्त्वा	विभज्य
दीप्	दीपित्वा	संदीप्य	भञ्ज्	भङ्क्त्वा	विभज्य
दुह्	दुग्ध्वा	संदुह्य	भाष्	भाषित्वा	संभाष्य
दृश्	दृष्ट्वा	संदृश्य	भिद्	भित्वा	प्रभिद्य
द्युत्	द्योतित्वा	विद्युत्य	भी	भीत्वा	संभीय
धा	हित्वा	विधाय	भुज्	भुक्त्वा	उपभुज्य
धाव्	धावित्वा	प्रधाव्य	भू	भूत्वा	संभूय
धृ	धृत्वा	आधृत्य	भृ	भृत्वा	संभृत्य
ध्मा	ध्मात्वा	आध्माय	भ्रंश्	भ्रष्ट्वा	प्रभ्रश्य
ध्यै	ध्यात्वा	संध्याय	भ्रम्	भ्रमित्वा, भ्रान्त्वा	संभ्रम्य
नम्	नत्वा	प्रणम्य	मथ्	मथित्वा	विमथ्य
नश्	नष्ट्वा	विनश्य	मन्	मत्वा	अनुमत्य
नि + वृ	——	निवृत्य	मा	मित्वा	प्रमाय
नी	नीत्वा	आनीय	मिल्	मिलित्वा	संमिल्य
नुद्	नुत्त्वा	प्रणुद्य	मुच्	मुक्त्वा	विमुच्य
नृत्	नर्तित्वा	प्रनृत्य	मुह्	मुग्ध्वा	संमुह्य
पच्	पक्त्वा	संपच्य	यज्	इष्ट्वा	समिज्य
पठ्	पठित्वा	संपठ्य	यम्	यत्वा	संयम्य
पत्	पतित्वा	निपत्य	या	[illegible]	[illegible]
पद्	पत्त्वा	संपद्य			

याच्	याचित्वा	अनुयाच्य	शम्	शान्त्वा	निशम्य
युज्	युक्त्वा	प्रयुज्य	शास्	शिष्ट्वा	अनुशिष्य
युध्	युद्ध्वा	प्रयुध्य	शी	शयित्वा	संशय्य
रक्ष्	रक्षित्वा	संरक्ष्य	शुष्	शुष्ट्वा	परिशुष्य
रच्	रचयित्वा	विरचय्य	श्रि	श्रित्वा	आश्रित्य
रभ्	रब्ध्वा	आरभ्य	श्रु	श्रुत्वा	संश्रुत्य
रम्	रत्वा	विरम्य	श्लिष्	श्लिष्ट्वा	आश्लिष्य
रुद्	रुदित्वा	विरुद्य	श्वस्	श्वसित्वा	विश्वस्य
रुध्	रुद्ध्वा	विरुध्य	सद्	सत्त्वा	निपद्य
रुह्	रुढ्वा	आरुह्य	सह्	सहित्वा	संसह्य
लप्	लपित्वा	विलप्य	साध्	साद्ध्वा	प्रसाध्य
लभ्	लब्ध्वा	उपलभ्य	सिच्	सिक्त्वा	अभिषिच्य
लम्ब्	लम्बित्वा	आलम्ब्य	सिध्	सिद्ध्वा	निषिध्य
लष्	लषित्वा	अभिलष्य	सिव्	सेवित्वा	संसीव्य
लिख्	लिखित्वा	आलिख्य	सृज्	सृष्ट्वा	विसृज्य
लिह्	लीढ्वा	आलिह्य	सेव्	सेवित्वा	निषेव्य
ली	लीत्वा	निलीय	सो	सित्वा	अवसाय
लुभ्	लुब्ध्वा	प्रलुभ्य	स्तु	स्तुत्वा	प्रस्तुत्य
वद्	उदित्वा	अनूद्य	स्था	स्थित्वा	प्रस्थाय
वन्द्	वन्दित्वा	अभिवन्द्य	स्ना	स्नात्वा	प्रस्नाय
वप्	उप्त्वा	समुप्य	स्निह्	स्निग्ध्वा	उपस्निह्य
वस्	उषित्वा	उपोष्य	स्पृश्	स्पृष्ट्वा	संस्पृश्य
वह्	ऊढ्वा	प्रोह्य	स्मृ	स्मृत्वा	विस्मृत्य
विद् (२ प०)	विदित्वा	संविद्य	स्वप	सुप्त्वा	संषुप्य
विद् (१०)	वेदयित्वा	निवेद्य	हन्	हत्वा	निहत्य
विश्	विष्ट्वा	प्रविश्य	हस्	हसित्वा	विहस्य
वृत्	वर्तित्वा	निवृत्य	हा	हित्वा	विहाय
वृध्	वर्धित्वा	संवृध्य	हु	हुत्वा	आहुत्य
वृष्	वर्षित्वा	प्रवृष्य	हृ	हृत्वा	प्रहृत्य
व्यध्	विद्ध्वा	आविध्य	हृष्	हृषित्वा	प्रहृष्य
शप्	शप्त्वा	अभिशप्य	ह्वे	हूत्वा	आहूय

(१०) ल्युट्, (११) अनीयर् प्रत्यय

(देखो अभ्यास ३९, ४३)

सूचना—(क) ल्युट् प्रत्यय भाववाचक शब्द बनाने के लिए धातु से लगता है। ल्युट् का 'अन' शेष रहता है। धातु को गुण होता है। ल्युट् प्रत्ययान्त शब्द नपुंसकलिंग होता है। अन्य नियमों के लिए देखो अभ्यास ४३। (ख) 'चाहिए' अर्थ में अनीयर् प्रत्यय होता है। अनीयर् का 'अनीय' शेष रहता है। अनीयर् प्रत्ययवाला रूप बनाने का सरल उपाय यह है कि ल्युट् के अन के स्थान पर अनीय लगा दो। अन्य नियमों के लिए देखो अभ्यास ३९। जैसे—कृ का करण, करणीय। दा-दान, दानीय। पठ्-पठन, पठनीय। **धातुएँ अकारादि क्रम से दी गई हैं।**

अद्	अदनम्	कूर्द्	कूर्दनम्	ग्रस्	ग्रसनम्	त्रै	त्राणम्
अधि+इ	अध्ययनम्	कृ	करणम्	ग्रह्	ग्रहणम्	दंश्	दंशनम्
अन्विष्	अन्वेषणम्	कृप्	कल्पनम्	घ्रा	घ्राणम्	दण्ड्	दण्डनम्
अर्च्	अर्चनम्	कृष्	कर्षणम्	चर्	चरणम्	दम्	दमनम्
अर्ज्	अर्जनम्	कॄ	करणम्	चल्	चलनम्	दह्	दहनम्
अस् (२)	भवनम्	क्रन्द्	क्रन्दनम्	चि	चयनम्	दा	दानम्
अस् (४)	असनम्	क्रम्	क्रमणम्	चिन्त्	चिन्तनम्	दिव्	देवनम्
आ+क्रम्	आक्रमणम्	क्री	क्रयणम्	चुर्	चोरणम्	दिश्	देशनम्
आ+चर्	आचरणम्	क्रीड्	क्रीडनम्	चेष्ट्	चेष्टनम्	दीप्	दीपनम्
आ+रभ्	आरभणम्	क्रुध्	क्रोधनम्	छिद्	छेदनम्	दुह्	दोहनम्
आ+रुह्	आरोहणम्	क्लिश्	क्लेशनम्	जन्	जननम्	दृश्	दर्शनम्
आ+लप्	आलपनम्	क्षम्	क्षमणम्	जप्	जपनम्	द्युत्	द्योतनम्
आस्	आसनम्	क्षिप्	क्षेपणम्	जि	जयनम्	द्रुह्	द्रोहणम्
आ+ह्वे	आह्वानम्	खन्	खननम्	जीव्	जीवनम्	धा	धानम्
इ	अयनम्	खाद्	खादनम्	ज्ञा	ज्ञानम्	धाव्	धावनम्
इष्	एषणम्	गण्	गणनम्	ज्वल्	ज्वलनम्	धृ	धरणम्
ईक्ष्	ईक्षणम्	गम्	गमनम्	डी	डयनम्	ध्यै	ध्यानम्
उद्+डी	उड्डयनम्	गर्ज्	गर्जनम्	तप्	तपनम्	ध्वंस्	ध्वंसनम्
कथ्	कथनम्	गाह्	गाहनम्	तुष्	तोषणम्	नन्द्	नन्दनम्
कम्	कमनम्	गॄ	गरणम्	तृप्	तर्पणम्	नम्	नमनम्
कम्प्	कम्पनम्	गै (गा)	गानम्	तॄ	तरणम्	नश्	नशनम्
कुप्	कोपनम्	ग्रन्थ्	ग्रन्थनम्	त्यज्	त्यजनम्	नि+गॄ	निगरणम्

निन्द्	निन्दनम्	भुज्	भोजनम्	लभ्	लभनम्	शम्	शमनम्
नि+यम्	नियमनम्	भू	भवनम्	लम्ब्	लम्बनम्	शास्	शासनम्
नि + वस्	निवसनम्	भृ	भरणम्	लष्	लषणम्	शिक्ष्	शिक्षणम्
नि + विद्	निवेदनम्	भ्रंश्	भ्रंशनम्	लस्	लसनम्	शी	शयनम्
नि + सिध्	निषेधनम्	भ्रम्	भ्रमणम्	लिख्	लेखनम्	शुभ्	शोभनम्
नी	नयनम्	मद्	मदनम्	लिह्	लेहनम्	शुष्	शोषणम्
नृत्	नर्तनम्	मन्	मननम्	ली	लयनम्	श्रि	श्रयणम्
पच्	पचनम्	मन्थ्	मन्थनम्	लुट्	लोटनम्	श्रु	श्रवणम्
पठ्	पठनम्	मा	मानम्	लुप्	लोपनम्	सं+मिल्	संमेलनम्
पत्	पतनम्	मिल्	मेलनम्	लुभ्	लोभनम्	सद्	सदनम्
पलाय्	पलायनम्	मुच्	मोचनम्	लोक्	लोकनम्	सह्	सहनम्
पा (१प.)	पानम्	मुद्	मोदनम्	लोच्	लोचनम्	साध्	साधनम्
पाल्	पालनम्	मुष्	मोषणम्	वच्	वचनम्	सिच्	सेचनम्
पुष्	पोषणम्	मुह्	मोहनम्	वञ्च्	वञ्चनम्	सिव्	सेवनम्
पूज्	पूजनम्	मृ	मरणम्	वद्	वदनम्	सु	सवनम्
प्र + काश्	प्रकाशनम्	यज्	यजनम्	वन्द्	वन्दनम्	सृ	सरणम्
प्रच्छ्	प्रच्छनम्	यत्	यतनम्	वप्	वपनम्	सृज्	सर्जनम्
प्र + आप्	प्रापणम्	यम्	यमनम्	वर्ण्	वर्णनम्	सृप्	सर्पणम्
प्र + विश्	प्रवेशनम्	या	यानम्	वह्	वहनम्	सेव्	सेवनम्
प्र + हस्	प्रहसनम्	याच्	याचनम्	वि + कस्	विकसनम्	स्तु	स्तवनम्
प्रेर्	प्रेरणम्	युज्	योजनम्	विद्	वेदनम्	स्था	स्थानम्
प्रेष्	प्रेषणम्	युध्	योधनम्	वि + धा	विधानम्	स्ना	स्नानम्
बन्ध्	बन्धनम्	रक्ष्	रक्षणम्	वि + नश्	विनशनम्	स्निह्	स्नेहनम्
बाध्	बाधनम्	रच	रचनम्	वि + लप्	विलपनम्	स्पृश्	स्पर्शनम्
बुध्	बोधनम्	रञ्ज्	रञ्जनम्	वि + श्वस्	विश्वसनम्	स्मृ	स्मरणम्
ब्रू	वचनम्	रम्	रमणम्	वृ	वरणम्	स्रंस्	स्रंसनम्
भक्ष्	भक्षणम्	राज	राजनम्	वृत्	वर्तनम्	स्वप्	स्वपनम्
भज्	भजनम्	रुच्	रोचनम्	वृध्	वर्धनम्	हन्	हननम्
भञ्ज्	भञ्जनम्	रुद्	रोदनम्	वृष्	वर्षणम्	हु	हवनम्
भाष्	भाषणम्	रुध्	रोधनम्	वेप्	वेपनम्	हृ	हरणम्
भिद्	भेदनम्	लप्	लपनम्	शप्	शपनम्	हृष्	हर्षणम्

(१२) घञ् प्रत्यय

(देखो अभ्यास ४१)

सूचना—भाव अर्थ में घञ् प्रत्यय होता है। घञ् का 'अ' शेष रहता है। घञन्त शब्द पुंलिंग होता है। घञ् प्रत्यय लगाकर रूप बनाने के नियमों के लिए देखो अभ्यास ४१। घञ् प्रत्ययान्त शब्द उपसर्गों के साथ बहुत प्रचलित हैं। स्वयं उपसर्ग लगाकर अन्य रूप बनावें। **धातुएँ अकारादि-क्रम से दी गई हैं।**

अधि + इ	अध्यायः	चर्	चारः	प्र + भू	प्रभावः	वि + लप्	विलापः
अभि+लष्	अभिलाषः	चल्	चालः	प्र + विश्	प्रवेशः	वि + वह्	विवाहः
अव + तॄ	अवतारः	चि	कायः	प्र + सद्	प्रसादः	वि + श्रम्	विश्रामः
अव+लिह्	अवलेहः	चुर्	चोरः	प्र + सृ	प्रसारः	वि+श्वस्	विश्वासः
अस् (२प.)	भावः	छिद्	छेदः	प्र + स्तु	प्रस्तावः	वि + सृज्	विसर्गः
आ + क्षिप्	आक्षेपः	जप्	जापः	प्र + हृ	प्रहारः	वृष्	वर्षः
आ + गम्	आगमः	तप्	तापः	बुध्	बोधः	शप्	शापः
आ + चर्	आचारः	यज्	यागः	भज्	भागः	शम्	शमः
आ + दृश्	आदर्शः	दह्	दाहः	भिद्	भेदः	शुच्	शोकः
आ + धृ	आधारः	दा	दायः	भुज्	भोगः	शुष्	शोषः
आ + मुद्	आमोदः	दिव्	देवः	मिल्	मेलः	श्रि	श्रायः
आ + रुह्	आरोहः	दुह्	दोहः	मुह्	मोहः	श्रु	श्रावः
आ + वृत्	आवर्तः	द्रुह्	द्रोहः	मृज्	मार्गः	श्लिष्	श्लेषः
आ + हन्	आघातः	धा	धायः	यज्	यागः	सं + कृ	संस्कारः
उत् + पद्	उत्पादः	नश्	नाशः	युज्	योगः	सं + तन्	सन्तानः
उत् + सह्	उत्साहः	नि + इ	न्यायः	युध्	योधः	सं + तुष्	सन्तोषः
उप + दिश्	उपदेशः	नि + वस्	निवासः	रञ्ज्	रागः	सं + मन्	संमानः
कम्	कामः	नि + सिध्	निषेधः	रम्	रामः	सं + यम्	संयमः
कुप्	कोपः	पच्	पाकः	रुध्	रोधः	सिच्	सेकः
कृ	कारः	पठ्	पाठः	लभ्	लाभः	सृज्	सर्गः
कृष्	कर्षः	पत्	पातः	लिख्	लेखः	स्निह्	स्नेहः
क्षिप्	क्षेपः	पुष्	पोषः	लुभ्	लोभः	स्पृश्	स्पर्शः
क्षुभ्	क्षोभः	प्र + काश्	प्रकाशः	वद्	वादः	स्वप्	स्वापः
गम्	गमः	प्र + कृ	प्रकारः	वि + कस्	विकासः	हस्	हासः
ग्रस्	ग्रासः	प्र + कृष्	प्रकर्षः	वि + क्लृप्	विकल्पः	हृ	हारः
ग्रह्	ग्राहः	प्र + नम्	प्रणामः	विद्	वेदः	हृष्	हर्षः

(१३) ण्वुल् प्रत्यय

(देखो अभ्यास ४३)

सूचना—कर्ता या 'वाला' अर्थ में ण्वुल् प्रत्यय होता है। ण्वुल् के स्थान पर 'अक' शेष रहता है। धातु को गुण या वृद्धि होगी। विशेष्य के अनुसार तीनों लिंग होते हैं। विशेष नियम के लिए देखो अभ्यास ४३। **धातुएँ अकारादि-क्रम से दी गई हैं।**

अध्यापि	अध्यापकः	द्विष्	द्वेषकः	प्र + विश्	प्रवेशकः	रुध्	रोधकः
अन्विष्	अन्वेषकः	धा	धायकः	प्र + सृ	प्रसारकः	लिख्	लेखकः
उत्+पद्	उत्पादकः	धाव्	धावकः	प्र + स्तु	प्रस्तावकः	वच्	वाचकः
उद् + धृ	उद्धारकः	धृ	धारकः	प्रेर्	प्रेरकः	वह्	वाहकः
उद् + मद्	उन्मादकः	ध्यै	ध्यायकः	बन्ध्	बन्धकः	वि + कस्	विकासकः
उप + दिश्	उपदेशकः	ध्वंस्	ध्वंसकः	बाध्	बाधकः	वि + आप्	व्यापकः
उप + आस्	उपासकः	नश्	नाशकः	बुध्	बोधकः	वि + धा	विधायकः
कृ	कारकः	निन्द्	निन्दकः	ब्रू	वाचकः	वि + भज्	विभाजकः
कृष्	कर्षकः	नि + विद्	निवेदकः	भक्ष्	भक्षकः	वि + स्कम्भ्	विष्कम्भकः
क्रीड्	क्रीडकः	नि + वृ	निवारकः	भज्	भाजकः	वृध्	वर्धकः
खाद्	खादकः	नि + सिध्	निषेधकः	भाष्	भाषकः	वृष्	वर्षकः
गण्	गणकः	नी	नायकः	भिद्	भेदकः	शास्	शासकः
गम्	गमकः	नृत्	नर्तकः	भुज्	भोजकः	शिक्ष्	शिक्षकः
गै	गायकः	पच्	पाचकः	भू	भावकः	शुष्	शोषकः
ग्रह्	ग्राहकः	पठ्	पाठकः	मुच्	मोचकः	श्रु	श्रावकः
चि	चायकः	पत्	पातकः	मुद्	मोदकः	सं + चल्	संचालकः
चिन्त्	चिन्तकः	परि + ईक्ष्	परीक्षकः	मुह्	मोहकः	सं + तप्	संतापकः
छिद्	छेदकः	पा(१प.)	पायकः	मृ	मारकः	सं + युज्	संयोजकः
जन्	जनकः	पाल्	पालकः	यज्	याजकः	सं + हृ	संहारकः
तृ	तारकः	पुष्	पोषकः	यम्	यामकः	साध्	साधकः
दह्	दाहकः	पूज्	पूजकः	याच्	याचकः	सिच्	सेचकः
दीप्	दीपकः	प्र + काश्	प्रकाशकः	युज्	योजकः	सेव्	सेवकः
दुह्	दोहकः	प्र + क्षिप्	प्रक्षेपकः	युध्	योधकः	स्था	स्थापकः
दृश्	दर्शकः	प्र + चर्	प्रचारकः	रक्ष्	रक्षकः	स्मृ	स्मारकः
द्युत्	द्योतकः	प्रच्छ्	प्रच्छकः	रञ्ज्	रञ्जकः	हन्	घातकः
द्रुह्	द्रोहकः	प्र + दा	प्रदायकः	रुच्	रोचकः	हृष्	हर्षकः

(१४) क्तिन्, (१५) यत् प्रत्यय

(देखो अभ्यास ४५, ४०)

सूचना—(क) भाववाचक संज्ञा बनाने के लिए धातु से क्तिन् प्रत्यय होता है। क्तिन् का 'ति' शेष रहता है। 'ति'-प्रत्ययान्त शब्द स्त्रीलिंग होते हैं। विशेष नियमों के लिए देखो अभ्यास ४५। (ख) 'चाहिए' अर्थ में अजन्त धातुओं से यत् प्रत्यय होता है। यत् का 'य' शेष रहता है। तीनों लिंगों के रूप चलते हैं। विशेष नियमों के लिए देखो अभ्यास ४०। धातुएँ अकारादि-क्रम से दी गई हैं।

क्तिन् प्रत्यय						यत् प्रत्यय	
अधि + इ	अधीतिः	तृप्	तृप्तिः	यम्	यतिः	अधि + इ	अध्येयम्
अस् (२५०)	भूतिः	दीप्	दीप्तिः	युज्	युक्तिः	आ+ख्या	आख्येयम्
आप्	आप्तिः	दृश्	दृष्टिः	रम्	रतिः	उप + मा	उपमेयम्
आ + संज्	आसक्तिः	धृ	धृतिः	रुह्	रूढिः	क्री	क्रेयम्
आ + सद्	आसत्तिः	नम्	नतिः	वि + आप्	व्याप्तिः	क्षि	क्षेयम्
आ + हु	आहुतिः	नी	नीतिः	वि + नश्	विनष्टिः	गै (गा)	गेयम्
इष्	इष्टिः	पच्	पक्तिः	वि + श्रम्	विश्रान्तिः	घ्रा	घ्रेयम्
उप + लभ्	उपलब्धिः	पा (१५०)	पीतिः	वृत्	वृत्तिः	चि	चेयम्
ऋध्	ऋद्धिः	पुष्	पुष्टिः	वृध्	वृद्धिः	जि	जेयम्
कम्	कान्तिः	पॄ	पूर्तिः	वृष्	वृष्टिः	ज्ञा	ज्ञेयम्
कृ	कृतिः	प्र + आप्	प्राप्तिः	शक्	शक्तिः	दा	देयम्
कृष्	कृष्टिः	प्री	प्रीतिः	शम्	शान्तिः	धा	धेयम्
कॄ	कीर्तिः	बुध्	बुद्धिः	शुध्	शुद्धिः	ध्यै (ध्या)	ध्येयम्
कॄत्	कीर्तिः	ब्रू	उक्तिः	श्रु	श्रुतिः	नी	नेयम्
क्रम्	क्रान्तिः	भज्	भक्तिः	सं + पद्	संपत्तिः	पा (१५०)	पेयम्
क्षम्	क्षान्तिः	भी	भीतिः	सं + सृ	संसृतिः	भू	भव्यम्
गम्	गतिः	भुज्	भुक्तिः	सं + हृ	संहृतिः	मा	मेयम्
गै (गा)	गीतिः	भू	भूतिः	सिध्	सिद्धिः	वि + धा	विधेयम्
चि	चितिः	भ्रम्	भ्रान्तिः	सृज्	सृष्टिः	श्रु	श्रव्यम्
छिद्	छित्तिः	मन्	मतिः	स्तु	स्तुतिः	सु	सव्यम्
जन्	जातिः	मा	मितिः	स्था	स्थितिः	स्था	स्थेयम्
ज्ञा	ज्ञातिः	मुच्	मुक्तिः	स्मृ	स्मृतिः	हा	हेयम्
तुष्	तुष्टिः	यज्	इष्टिः	स्वप्	सुप्तिः	हु	हव्यम्

(६) सन्धि-विचार (क)

(क) स्वर-सन्धि (१) यण्-सन्धि (देखो अभ्यास १०)

(इको यणचि) इ ई को य्, उ ऊ को व्, ऋ ॠ को र्, ऌ को ल् हो जाता है, यदि बाद में कोई स्वर हो तो। सवर्ण (वैसा ही) स्वर हो तो नहीं। जैसे :—

(१)	(२)	(३)
प्रति + एकः = प्रत्येकः	पठतु + एकः = पठत्वेकः	पितृ + आ = पित्रा
पठति + अत्र = पठत्यत्र	अनु + अयः = अन्वयः	मातृ + ए = मात्रे
इति + अत्र = इत्यत्र	मधु + अरिः = मध्वरिः	धातृ + अंशः = धात्रंशः
इति + आह = इत्याह	गुरु + आज्ञा = गुर्वाज्ञा	कर्तृ + आ = कर्त्रा
यदि + अपि = यद्यपि	पठतु + अत्र = पठत्वत्र	कर्तृ + ई = कर्त्री
नदी + औ = नद्यौ	वधू + औ = वध्वौ	
सुधी + उपास्यः = सुध्युपास्यः		(४) ऌ + आकृतिः = लाकृतिः

(२) अयादिसन्धि (देखो अभ्यास ११)

(एचोऽयवायावः) ए को अय्, ओ को अव्, ऐ को आय्, औ को आव् हो जाता है, बाद में कोई स्वर हो तो। (पदान्त ए या ओ के बाद अ होगा तो नहीं)। जैसे—

(१)	(२)	(३)
हरे + ए = हरये	भो + अति = भवति	नै + अकः = नायकः
कवे + ए = कवये	पो + अनः = पवनः	गै + अकः = गायकः
ने + अनम् = नयनम्	गुरो + ए = गुरवे	गै + अति = गायति
शे + अनम् = शयनम्	भानो + ए = भानवे	(४) द्वौ + एतौ = द्वावेतौ
जे + अः = जयः	भो + अनम् = भवनम्	पौ + अकः = पावकः
संचे + अः = संचयः	श्रो + अणम् = श्रवणम्	भौ + अकः = भावकः

(३) गुणसन्धि (देखो अभ्यास १२)

(आद्गुणः) (१) अ या आ के बाद इ या ई हो तो दोनों को 'ए' होगा। (२) अ या आ के बाद उ या ऊ हो तो दोनों को 'ओ' होगा। (३) अ या आ के बाद ऋ या ॠ हो तो दोनों को 'अर्' होगा। (४) अ या आ के बाद ऌ होगा तो दोनों को अल् होगा। जैसे—

(१)	(२)	(३)
महा + ईशः = महेशः	पर + उपकारः = परोपकारः	महा + ऋषिः = महर्षिः
गण + ईशः = गणेशः	महा + उत्सवः = महोत्सवः	राज + ऋषिः = राजर्षिः
रमा + ईशः = रमेशः	हित + उपदेशः = हितोपदेशः	ग्रीष्म + ऋतुः = ग्रीष्मर्तुः
तथा + इति = तथेति	गंगा + उदकम् = गंगोदकम्	ब्रह्म + ऋषिः = ब्रह्मर्षिः
न + इदम् = नेदम्	पश्य + उपरि = पश्योपरि	(४) तव + ऌकारः = तवल्कारः

(४) वृद्धिसन्धि

(देखो अभ्यास १३)

(वृद्धिरेचि) (१) अ या आ के बाद ए या ऐ हो तो दोनों को 'ऐ' होगा। (२) अ या आ के बाद ओ या औ होगा तो दोनों को 'औ' होगा। जैसे—

(१)		(२)	
अत्र + एकः	= अत्रैकः	तण्डुल + ओदनम्	= तण्डुलौदनम्
पश्य + एतम्	= पश्यैतम्	जल + ओघः	= जलौघः
सा + एषा	= सैषा	महा + ओषधिः	= महौषधिः
राज + ऐश्वर्यम्	= राजैश्वर्यम्	देव + औदार्यम्	= देवौदार्यम्

(५) पूर्वरूपसन्धि

(देखो अभ्यास १४)

(एङः पदान्तादति) पद (अर्थात् सुबन्त या तिङन्त) के अन्तिम ए या ओ के बाद अ हो तो उसको पूर्वरूप (अर्थात् ए या ओ जैसा रूप) हो जाता है। (अ हटा है, इस बात के सूचनार्थ ऽ (अवग्रह चिह्न) लगा दिया जाता है।) जैसे—

(१)		(२)	
हरे + अव	= हरेऽव	विष्णो + अव	= विष्णोऽव
लोके + अस्मिन्	= लोकेऽस्मिन्	रामो + अधुना	= रामोऽधुना
विद्यालये + अस्मिन्	= विद्यालयेऽस्मिन्	लोको + अयम्	= लोकोऽयम्

(६) सवर्णदीर्घसन्धि

(देखो अभ्यास १५)

(अकः सवर्णे दीर्घः) अ इ उ ऋ के बाद कोई सवर्ण (सदृश) अक्षर हो तो दोनों के स्थान पर उसी वर्ण का दीर्घ अक्षर हो जाता है। अर्थात् (१) अ या आ + अ या आ = आ। (२) इ या ई + इ या ई = ई। (३) उ या ऊ + उ या ऊ = ऊ। (४) ऋ या ॠ + ऋ या ॠ = ॠ।

(१)	(२)	(३)
हिम + आलयः = हिमालयः	गिरि + ईशः = गिरीशः	गुरु + उपदेशः = गुरूपदेशः
विद्या + आलयः = विद्यालयः	श्री + ईशः = श्रीशः	भानु + उदयः = भानूदयः
तथा + अपि = तथापि	इति + इदम् = इतीदम्	लघु + ऊर्मिः = लघूर्मिः
शिष्टः + आचारः = शिष्टाचारः	पठति + इदम् = पठतीदम्	(४) होतृ + ऋकारः = होतॄकारः

(ख) हल्सन्धि

(७) श्चुत्वसन्धि

(देखो अभ्यास १६)

(स्तोः श्चुना श्चुः) स् या तवर्ग से पहले या बाद में श् या चवर्ग कोई भी हो तो स् और तवर्ग को क्रमशः श् और चवर्ग हो जाता है। जैसे—

रामस् + च = रामश्च	तत् + च = तच्च	सद् + जनः = सज्जनः
कस् + चित् = कश्चित्	सत् + चित् = सच्चित्	उद् + ज्वलः = उज्ज्वलः
दुस् + चरित्रः = दुश्चरित्रः	सत् + चरित्रः = सच्चरित्रः	याच् + ना = याच्ञा
हरिस् + शेते = हरिश्शेते	उत् + चारणम् = उच्चारणम्	शार्ङ्गिन् + जयः = शार्ङ्गिञ्जयः

(८) ष्टुत्वसन्धि (देखो अभ्यास १७)

(ष्टुना ष्टुः) स् या तवर्ग के पहले या बाद में ष् या टवर्ग कोई भी हो तो स् और तवर्ग को क्रमशः ष् और टवर्ग हो जाता है। जैसे,

इष् + तः = इष्टः	रामस् + षष्ठः = रामष्षष्ठः	विष् + नुः = विष्णुः
पेष् + ता = पेष्टा	उद् + डीनः = उड्डीनः	कृष् + नः = कृष्णः
दुष् + तः = दुष्टः	तत् + टीका = तट्टीका	उष् + त्रः = उष्ट्रः

(९) जश्त्वसन्धि (१) (देखो अभ्यास १८)

(झलां जशोऽन्ते) झलों (वर्ग के १, २, ३, ४ और ऊष्म) को जश् (३ अर्थात् अपने वर्ग के तृतीय अक्षर) होते हैं, झल् पद के अन्तिम अक्षर हों तो। (पद अर्थात् सुबन्त या तिङन्त)। जैसे,

सुप् + अन्तः = सुबन्तः	चित् + आनन्दः = चिदानन्दः	षट् + एव = षडेव
अच् + अन्तः = अजन्तः	दिक् + अम्बरः = दिगम्बरः	षट् + आननः = षडाननः
जगत् + ईशः = जगदीशः	उत् + देश्यम् = उद्देश्यम्	दिक् + गजः = दिग्गजः

(१०) जश्त्वसन्धि (२) (देखो अभ्यास १९)

(झलां जश् झशि) झलों (वर्ग के १, २, ३, ४, ऊष्म) को जश् (३, अपने वर्ग के तृतीय अक्षर) होते हैं, बाद में झश् (वर्ग के ३, ४) हों तो। (यह नियम पद के बीच में लगता है, पहला नियम (९) पद के अन्त में।)

बुध् + धि = बुद्धिः	दघ् + धः = दग्धः	युध् + धम् = युद्धम्
सिध् + धिः = सिद्धिः	दुघ् + धम् = दुग्धम्	वृध् + धिः = वृद्धिः
क्षुभ् + धः = क्षुब्धः	लभ् + धः = लब्धः	शुध् + धिः = शुद्धिः

(११) चर्त्व सन्धि (देखो अभ्यास २०)

(खरि च) झलों (वर्ग के १, २, ३, ४, ऊष्म) को चर् (१, उसी वर्ग के प्रथम अक्षर होते हैं, बाद में खर् (१, २, श, ष, स) हों तो। जैसे,

सद् + कारः = सत्कारः	तद् + परः = तत्परः	सद् + पुत्रः = सत्पुत्रः
उद् + पन्नः = उत्पन्नः	उद् + साहः = उत्साहः	तज् + छिवः = तच्छिवः

(१२) अनुस्वार सन्धि (देखो अभ्यास ९)

(मोऽनुस्वारः) पदान्त म् के बाद कोई हल् (व्यंजन) हो तो म् को अनुस्वार (ं) हो जाता है, बाद में स्वर हो तो नहीं। जैसे,

हरिम् + वन्दे = हरिं वन्दे	कम् + चित् = कंचित्	सत्यम् + वद = सत्यं वद
गुरुम् + नमति = गुरुं नमति	कार्यम् + कुरु = कार्यं कुरु	धर्मम् + चर = धर्मं चर

(ग) विसर्गसन्धि (१३) विसर्गसन्धि (देखो अभ्यास २१)

(विसर्जनीयस्य सः) विसर्ग के बाद खर् (वर्ग के १, २, श, ष, स) हो तो विसर्ग को स् हो जाता है। (श् या चवर्ग बाद में हो तो श्चुत्व सन्धि भी)। जैसे,

हरिः + त्रायते = हरिस्त्रायते।	बालः + चलति = बालश्चलति।
रामः + तिष्ठति = रामस्तिष्ठति।	रामः + शेते = रामश्शेते।
कः + चित् = कश्चित्।	जनाः + तिष्ठन्ति = जनास्तिष्ठन्ति।
निः + चलः = निश्चलः।	रामः + च = रामश्च।

(१४), (१५) उत्व सन्धि (१) (देखो अभ्यास २२)

(१४) (**ससजुषो रुः**) पद के अन्तिम स् को रु (:) होता है। सजुष् शब्द के ष् को भी रु होता है। (**सूचना**—इस रु का साधारणतया विसर्ग (:) ही बचता है। इसी रु को सन्धिनियम १५, १६ और १७ से उ या य् होता है। जहाँ उ या य् नहीं होगा, वहाँ पर या तो विसर्ग बचेगा या र् बचेगा।)

(१५) (**अतो रोरप्लुतादप्लुते**) ह्रस्व अ के बाद रु (: या र्) को उ हो जाता है, बाद में ह्रस्व अ हो तो। **सूचना**—इस उ को पूर्ववर्ती अ के साथ सन्धि-नियम ३ से गुणसन्धि करके ओ हो जाता है और बाद के अ को सन्धि-नियम ५ से पूर्वरूप सन्धि होती है। अतएव अः + अ = ओऽ होता है।) जैसे,

रामः + अस्ति = रामोऽस्ति।	रामः + अवदत् = रामोऽवदत्।
कः + अपि = कोऽपि।	नृपः + अगच्छत् = नृपोऽगच्छत्।
सः + अपि = सोऽपि।	देवः + अधुना = देवोऽधुना।
सः + अपठत् = सोऽपठत्।	कः + अयम् = कोऽयम्।

सूचना—स्मरण रखें कि रामः, कः आदि में सब स्थानों पर स् का ही सन्धि-नियम १४ के अनुसार विसर्ग (:) दीखता है। यह विसर्ग मूलरूप में सु (स्) है, उसी को रु (र् या :) होता है। जहाँ पर उ या य् नहीं होगा, वहाँ पर र् शेष रहता है। अतः सन्धि-नियम १४ से अ आ के अतिरिक्त अन्य स्वरों के बाद विसर्ग का 'र्' शेष रहता है, बाद में कोई स्वर या व्यंजन (३, ४, ५) हो तो। जैसे,

हरिः + अवदत् = हरिरवदत्।	लक्ष्मीः + इयम् = लक्ष्मीरियम्।
गुरुः + अस्ति = गुरुरस्ति।	वधूः + एषा = वधूरेषा।
शिशुः + आगच्छत् = शिशुरागच्छत्।	गुरोः + भाषणम् = गुरोर्भाषणम्।
पितुः + इच्छा = पितुरिच्छा।	हरेः + द्रव्यम् = हरेर्द्रव्यम्।

(१६) उत्व सन्धि (देखो अभ्यास २३)

(हशि च) ह्रस्व अ के बाद रु (र् या :) को उ होता जाता है, बाद में हश् (वर्ग के ३, ४, ५, ह, य, व, र, ल) हो तो। (सूचना—सन्धि-नियम १५ बाद में अ हो तब लगता है, यह बाद में हश् हो तो। उ करने के बाद सन्धि-नियम ३ से गुण होकर ओ होगा। अतः अः + हश् = ओ + हश् होगा, अर्थात् अः को ओ)। जैसे :—

रामः + वन्द्यः = रामो वन्द्यः।	देवः + गच्छति = देवो गच्छति।
कृष्णः + वदति = कृष्णो वदति।	बालः + हसति = बालो हसति।
बालः + लिखति = बालो लिखति।	नृपः + रक्षति = नृपो रक्षति।
रामः + जयति = रामो जयति।	शिष्यः + जयति = शिष्यो जयति।

(१७) यत्वसन्धि (देखो अभ्यास २४)

(भोभगोअघोअपूर्वस्य योऽशि) भोः, भगोः, अघोः शब्द और अ या आ के बाद रु (र् या :) को य् होता है, बाद में अश् (स्वर, ह, य, व, र, ल, वर्ग के ३, ४, ५) हो तो। (सूचना—१. हलि सर्वेषाम्, २. लोपः शाकल्यस्य। य् के बाद यदि कोई व्यंजन होगा तो य् का लोप अवश्य होगा। य् के बाद यदि कोई स्वर होगा तो य् का लोप ऐच्छिक है। यदि लोप करेंगे तो कोई दीर्घ, गुण, वृद्धि आदि सन्धि कार्य नहीं होगा। अर्थात् अः या आः + अश् = अ या आ + अश्।) जैसे,

देवाः + गच्छन्ति = देवा गच्छन्ति।	रामः + इच्छति = राम इच्छति।
नराः + हसन्ति = नरा हसन्ति।	शिष्याः + एते = शिष्या एते।
देवाः + इह = देवा इह, देवायिह।	छात्राः + लिखन्ति = छात्रा लिखन्ति।
कन्याः + इच्छन्ति = कन्या इच्छन्ति।	पुत्रः + आगच्छति = पुत्र आगच्छति।

(१८) सुलोपसन्धि (देखो अभ्यास २५)

(एतत्तदोः सुलोपोऽकोरनञ् समासे हलि) सः और एषः के विसर्ग का लोप होता है, बाद में कोई हल् (व्यंजन) हो तो। (सकः, एषकः, असः, अनेषः के विसर्ग का लोप नहीं होगा)। (सूचना—सः, एषः के बाद अ होगा तो सन्धि-नियम १५ से 'ओऽ' होगा। अन्य स्वर बाद में होंगे तो संधिनियम १७ से विसर्ग का लोप)।

(१) सः + पठति = स पठति।	(२) सः + अयम् = सोऽयम्।
सः + लिखति = स लिखति।	सः + आगत = स आगतः।
एषः + वदति = एष वदति।	सः + इच्छति = स इच्छति।
एषः + गच्छति = एष गच्छति।	एषः + अपि = एषोऽपि।

सन्धि-विचार (ख)

(१९) (एङि पररूपम्) अकारान्त उपसर्ग के बाद धातु का ए या ओ हो तो दोनों के स्थान पर पररूप (अर्थात् ए या ओ जैसा रूप) हो जाता है। अर्थात् (१) अ + ए = ए, (२) अ + आ = ओ। जैसे—(१) प्र + एजते = प्रेजते। (२) उप + ओषति = उपोषति।

(२०) (ईदूदेद्द्विवचनं प्रगृह्यम्) ईकारान्त, उकारान्त और एकारान्त द्विवचन के रूप की प्रगृह्य संज्ञा होती है अर्थात् उनके साथ कोई सन्धि का कार्य नहीं होगा। जैसे—

हरी + एतौ = हरी एतौ।	गङ्गे + अमू = गङ्गे अमू।
विष्णू + इमौ = विष्णू इमौ।	पचेते + इमौ = पचेते इमौ।

(२१) (यरोऽनुनासिकेऽनुनासिको वा) पदान्त यर् (ह को छोड़कर सभी व्यंजन) के बाद अनुनासिक (वर्ग का पञ्चम अक्षर) हो तो यर् को अपने वर्ग का पंचम अक्षर हो जायगा। यह नियम ऐच्छिक है। जैसे—

वाक् + मयम् = वाङ्मयम्।	सद् + मतिः = सन्मतिः।
दिक् + नागः = दिङ्नागः।	पद् + नगः = पन्नगः।
तत् + न = तन्न।	षट् + मुखः = षण्मुखः।
तत् + मयम् = तन्मयम्।	अप् + मयम् = अम्मयम्।

(२२) (तोर्लि) तवर्ग के बाद ल हो तो तवर्ग को भी ल् हो जाता है। अर्थात् (१) त् या द् + ल = ल्ल, (२) न् + ल = ँल्ल। जैसे—

उत् + लेखः = उल्लेखः।	पद + लवः = पल्लवः।
तत् + लीनः = तल्लीनः।	विद्वान् + लिखति = विद्वाँल्लिखति।

(२३) (शश्छोऽटि) पदान्त झय् (वर्ग के १, २, ३, ४) के बाद श् हो तो उसको छ् हो जाता है, यदि उस श् के बाद अट् (स्वर, ह्, य्, व्, र्) हो तो। यह नियम ऐच्छिक है। श् को छ् होने पर पूर्ववर्ती त् को श्चुत्वसन्धि (नियम ७) से च् हो जायेगा। जैसे—

तत् + शिवः = तच्छिवः	सत् + शीलः = सच्छीलः।
तत् + शिला = तच्छिला।	उत् + श्रायः = उच्छ्रायः।

(२४) (**अनुस्वारस्य ययि परसवर्णः**) अनुस्वार के बाद यय् (य, र, ल, व, वर्ग के १, २, ३, ४, ५) हो तो अनुस्वार को परसवर्ण (अगले वर्ण का पंचम अक्षर) हो जाता है। जैसे—

अं + कः = अङ्कः ।	अं + चितः = अञ्चितः ।	शां + तः = शान्तः ।
शं + का = शङ्का ।	कं + ठः = कण्ठः ।	सं + मानः = सम्मानः ।

(२५) (**नश्छव्यप्रशान्**) पदान्त न् को रु (:, स्) होता है, यदि छव् (च्, छ्, ट्, ठ्, त्, थ्) बाद में हो और छव् के बाद अम् (स्वर, ह, अन्तःस्थ, वर्ग के पंचम अक्षर) हो तो। प्रशान् शब्द में नियम नहीं लगेगा। इस नियम के साथ कुछ अन्य नियम भी लगते हैं, अतः इस नियम का रूप होगा—न् + छव् = ँस् + छव् या ंस्+छव्। श्चुत्व-नियम यदि प्राप्त होगा तो लगेगा। जैसे—

कस्मिन् + चित् = कस्मिंश्चित् ।	शार्ङ्गिन् + छिन्धि = शार्ङ्गिंश्छिन्धि ।
धीमान् + च = धीमांश्च ।	चक्रिन् + त्रायस्व = चक्रिंस्त्रायस्व ।
अस्मिन् + तरौ = अस्मिंस्तरौ ।	तस्मिन् + तथा = तस्मिंस्तथा ।

(२६) (**वा शरि**) विसर्ग के बाद शर् (श, ष, स) हो तो विसर्ग को विसर्ग और स् दोनों होते हैं। श्चुत्व या ष्टुत्व (नियम ७, ८) यदि प्राप्त होंगे तो लगेंगे। जैसे—

हरिः + शेते = हरिः शेते, हरिश्शेते ।	रामः + षष्ठः = रामष्षष्ठः ।
रामः + शेते = रामः शेते, रामश्शेते ।	बालः + स्वपिति = बालस्स्वपिति ।

(२७) (**रो रि**) र् के बाद र् हो तो पहले र् का लोप हो जाता है।

(२८) (**ढ्रलोपे पूर्वस्य दीर्घोऽणः**) ढ् या र् का लोप हुआ हो तो उससे पूर्ववर्ती अ, इ, उ को दीर्घ हो जाता है। जैसे—

पुनर् + रमते = पुना रमते ।	शम्भुर् + राजते = शम्भू राजते ।
हरिर् + रम्यः = हरी रम्यः ।	अन्तर् + राष्ट्रियः = अन्ताराष्ट्रियः ।

(७) पत्रादिलेखनप्रकार

आवश्यक-निर्देश

पत्रों के लेखन में निम्नलिखित बातों का अवश्य ध्यान रखें :—

१. पत्र-लेखन बहुत सरल और स्पष्ट भाषा में होना चाहिए। इसमें प्रायः वार्तालाप में व्यवहृत भाषा का ही रूप अपनाया जाता है, जिससे पत्र का भाव सरलता से हृदयंगम हो सके।

२. पत्रों में अनावश्यक विशेषणों का परित्याग करना चाहिए। पाण्डित्य-प्रदर्शन का प्रयत्न पत्र में अनुचित है, यह निबन्ध आदि का विषय है।

३. जिस उद्देश्य से पत्र लिखा गया है, उसका स्पष्ट उल्लेख करना चाहिए।

४. पत्र यथासंभव संक्षिप्त होना चाहिए। उसमें आवश्यक बातों का ही उल्लेख करना चाहिए। अनावश्यक बातों का उल्लेख और विस्तार उचित नहीं है।

५. साधारणतया पत्रों को ४ श्रेणी में बाँट सकते हैं। तदनुसार ही उनका लेखन होता है। (क) अतिपरिचित व्यक्तियों को। (ख) सामान्यतया परिचित व्यक्तियों को। (ग) अपरिचित व्यक्तियों को। (घ) केवल व्यावहारिक पत्र।

(क) १. पिता, पुत्र, माता, मित्र, पत्नी, पति आदि के लिए ऐसे पत्र होते हैं। इनमें प्रारम्भ में ऊपर दाहिनी ओर स्व-स्थान-नाम तथा तिथि या दिनांक देना चाहिए। २. उसके नीचे अपने से बड़े को 'प्रणामः', 'नमस्कारः', 'नमस्ते' आदि। समान आयुवालों को 'नमस्ते', छोटों को 'स्वस्ति', 'आशीर्वादः' आदि। ३. पत्र के अन्त में बड़ों के लिए 'भवदाज्ञाकारी', 'भवत्कृपाकांक्षी' आदि, समान आयुवालों को 'भवदीयः', 'भावत्कः' आदि, छोटों को 'शुभाकांक्षी', 'शुभचिन्तकः' आदि लिखना चाहिए। ४. पत्र का पता लिखने में पहली पंक्ति में व्यक्ति का नाम लिखना चाहिए, उसके नीचे उपाधि आदि। दूसरी पंक्ति में ग्राम-नाम आदि, तीसरी पंक्ति में पोस्ट ऑफिस (डाकखाना) का नाम, चौथी पंक्ति में जिले का नाम। यदि दूसरे प्रान्त या देश के लिए हो तो अन्त में प्रान्त या देश का नाम।

(ख) सामान्य परिचित के सम्बोधन में व्यक्ति का नाम-निर्देश करें। शेष पूर्ववत्।

(ग) अपरिचितों को सम्बोधन में 'श्रीमान्', 'महोदय' आदि लिखें। अन्त में 'भवदीयः'। शेष पूर्ववत्।

(घ) केवल व्यावहारिक पत्रों में (१) प्रारम्भ में अधिकारी व्यक्ति या कम्पनी आदि का नाम एवं कार्यालय सम्बन्धी पता लिखें। (२) तदनन्तर संबोधन में 'श्रीमन्' या 'महोदयः'। (३) प्रणाम, नमस्ते आदि न लिखें। (४) अन्त में 'भवदीयः'। (५) केवल कार्य-सम्बन्धी बात लिखें। पारिवारिक या वैयक्तिक नहीं।

(१) पिता को पत्र ।

प्रयागतः

तिथिः चैत्र शुक्ला ९, २०२२ वि०

श्रीमतो मान्यस्य पितृवर्यस्य पादपद्मेषु सादरं प्रणतिः ।

अत्र शं तत्रास्तु । मया भवदीयं कृपापत्रं प्राप्तम् । अखिलं च वृत्तं ज्ञातम् । अद्यत्वे मम वार्षिकी परीक्षा भवति । अहम् अध्ययने सम्यक्तया दत्तचित्तोऽस्मि । साम्प्रतं यावत् परीक्षायाः प्रश्नपत्राणि साधु लिखितानि सन्ति । आशासे परीक्षायामवश्यं सफलो भविष्यामि । परीक्षानन्तरं शीघ्रमेव गृहं प्रति प्रस्थास्ये । पूज्याया मातुश्चरणयोः मम प्रणतिः कथनीया ।

भवदाज्ञाकारी पुत्रः—

देवदत्तः ।

(२) मित्र को पत्र ।

गुरुकुल-महाविद्यालय-ज्वालापुरतः

दिनांकः २–११–६४ ईसवीयः

प्रियमित्र शिवकुमार ! सप्रेम नमस्ते ।

अत्र कुशलं तत्रास्तु । भवत्पत्रं समासाद्य मम चेतोऽतीव हर्षमनुभवति । अद्य दीपमालिकायाः पर्व विद्यते । सर्वेऽपि छात्रा अद्य प्रसन्नचेतसो दीपमालिकामहोत्सव-सम्पादनसंलग्नाः सन्ति । एतत् ज्ञात्वा सर्वेऽपि प्रसन्नाः सन्ति यद् भवान् बी० ए० परीक्षा-मुत्तीर्णः । सर्वे छात्राः अध्यापकाश्च साधुवादान् वितरन्ति । शेषमन्यत् कुशलम् । सद्य एव पत्रोत्तरं प्रेषणीयम् ।

भवद्बन्धुः—

रामदत्तः ।

(३) विश्वविद्यालय के एक छात्र को

काशी-विश्वविद्यालयतः,

दिनाङ्कः १०–७–६४ ई०

श्रीयुत सन्तोषकुमार ! नमस्ते ।

अत्र शं तत्रास्तु । अहमद्यैव गृहात् समायातोऽस्मि । एतत्तु भवतो ज्ञातमेवास्ति यत् ममानुजः विज्ञानविषयमङ्गीकृत्य इण्टरपरीक्षामुत्तीर्णः । स दुर्भाग्यवशात् तृतीय-श्रेण्यामुत्तीर्णः, अतएव तस्य प्रवेशो नात्र आशास्यते । भवतो महती कृपा भविष्यति यदि भवान् स्वीये प्रयागविश्वविद्यालये तस्य बी० एस-सी० कक्षायां प्रवेशार्थं प्रयतिष्यते । भवतो गृहे सर्वेऽपि कुशलिनः सन्ति । पत्रं सद्य एव प्रेष्यम् ।

भावत्कः—विनयकुमारः ।

(४) अवकाश के लिए आचार्य को प्रार्थना-पत्र

श्रीमन्तः प्रधानाचार्यमहोदयाः,

राजकीयमहाविद्यालयः, वाराणसी।

मान्यवर !

अहमद्य दिनद्वयाद् अतीव रुग्णोऽस्मि। विद्यालयमागन्तुं न शक्नोमि। अतो दिवसद्वयस्यावकाशं स्वीकृत्य मामनुग्रहीष्यन्ति श्रीमन्तः।

भवतामाज्ञाकारी शिष्यः

दिनाङ्कः—४-११-६४ ई०

प्रेमनाथः (इण्टर० प्रथमवर्षस्थः)

(५) पुस्तक के लिए प्रकाशक को पत्र

श्रीप्रबन्धकमहोदयः,

विश्वविद्यालय-प्रकाशनम्, वाराणसी।

श्रीमन् !

मया भवत्प्रकाशितं 'रचनानुवादकौमुदी' नाम पुस्तकं दृष्टम्। कृपया पञ्च पुस्तकानि अधोनिर्दिष्टस्थाने वी० पी० पी० द्वारा शीघ्रमेव प्रेषणीयानि।

दिनाङ्कः—१-७-६५ ई०

भवदीय—रूपनारायणशास्त्री, प्रकाशन-विभागः,

हिन्दी-साहित्य-सम्मेलनम्, प्रयागः।

(६) निमन्त्रणपत्रम्

श्रीमन्महोदय !

एतद् विदित्वा भवन्तो नूनं हर्षं प्राप्स्यन्ति यत् परेशस्य महत्याऽनुकम्पया मम ज्येष्ठाया दुहितुः कुमार्यां विमलादेव्याः शुभपाणिग्रहणसंस्कारः काशीवास्तव्यस्य श्रीमतः निखिलचन्द्रशर्मणो ज्येष्ठपुत्रेण सुरेशचन्द्रशर्मणा सह २०-७-६५ ई० दिनांके रात्रौ १० वादने सम्पत्स्यते। भवन्तः सपरिवारं निर्दिष्टसमये समागत्यास्मान् अनुग्रहीष्यन्ति।

६०० मुट्ठीगंज,

प्रयागः।

भवद्दर्शनाभिलाषी—

दीनबन्धुः शर्मा

दिनाङ्कः—२५-६-६५ ई०।

(स्वीकृति-सूचनयाऽनुग्राह्यः)

(७) परिषद् की सूचना

श्रीमन्तो मान्याः !

सविनयमेतद् निवेद्यते यद् आस्माकीनाया विद्यालयीयसंस्कृतपरिषदः साप्ताहिक-मधिवेशनम् आगामिनि शुक्रवासरे (दिनांकः २२–१–६५ ई०) सायंकाले चतुर्वादने विद्यालयस्य महाकक्षे (हॉल) भविष्यति। सर्वेषामपि छात्राणाम् अध्यापकानां च उपस्थितिः सविनयं सादरं च प्रार्थ्यते।

निवेदकः—

दिनाङ्कः—१८–१–६५ ई० गणेशदत्तपाण्डेयः (मन्त्री)

(८) (क) प्रस्ताव, (ख) अनुमोदन, (ग) समर्थन

(क) (१) आदरणीयाः सभासदः, प्रियाः विद्यार्थिबन्धवश्च !

अद्य सौभाग्यमेतद् अस्माकं यद्......(गुरुकुलमहाविद्यालय-ज्वालापुरस्य आचार्य-वर्याः डॉ० श्रीमन्तो हरिदत्तशास्त्रिणः, सप्ततीर्थाः, व्याकरणवेदान्ताचार्याः, एम० ए०, पी-एच० डी० आदि विविधोपाधिविभूषिताः) अत्र समायाताः सन्ति। अतोऽहं प्रस्तावं करोमि यत् श्रीमन्तो मान्या विद्वद्वरेण्या आचार्यवर्याः अद्यतन्या अस्याः सभायाः सभापतिपदमलङ्कुर्वन्तु इति। आशासे एतेषां सभापतित्वे सभायाः सर्वमपि कार्यं सुचारुरूपेण सम्पत्स्यते इति। आशासे अन्येऽपि अस्य प्रस्तावस्य अनुमोदनं समर्थनं च करिष्यन्ति।

(क) (२) मान्याः सभासदः !

अहमेतस्याः सभाया मन्त्रिपदार्थं (सभापतिपदार्थम्, उपसभापतिपदार्थम्, कोषाध्यक्ष-पदार्थम्) श्रीमतः......नाम प्रस्तवीमि।

(ख) अहमेतस्य प्रस्तावस्य हृदयेन अनुमोदनं करोमि।

(ग) अहमेतस्य प्रस्तावस्य हार्दिकं समर्थनं करोमि।

(९) व्याख्यान

श्रीमन्तः परमसंमाननीयाः सभापतिमहोदयाः ! आदरणीयाः सभासदश्च !

अद्य अहं भवतां पुरस्तात्...(विद्या, अहिंसा, सत्य, परोपकार) विषयमङ्गीकृत्य किंचिद् वक्तुमिच्छामि। संस्कृतभाषाभाषणस्य अनभ्यासवशाद् याः काश्चन त्रुट्यो भवेयुः, ता भवद्भिः क्षन्तव्याः। ......(तदनन्तरं व्याख्यानस्य प्रारम्भः।)

(८) निबन्ध-माला

आवश्यक-निर्देश

१. किसी विषय पर अपने विचारों और भावों को सुन्दर, सुगठित, सुबोध एवं क्रमबद्ध भाषा में लिखने को निबन्ध कहते हैं। निबन्ध के लिए दो बातों की आवश्यकता होती है :—१. निबन्ध की सामग्री। २. निबन्ध की शैली।

निबन्ध की सामग्री एकत्र करने के ३ साधन हैं—१. निरीक्षण अर्थात् प्रकृति को स्वयं देखना और ज्ञान एकत्र करना। २. अध्ययन अर्थात् पुस्तकों आदि से उस विषय का ज्ञान प्राप्त करना। ३. मनन अर्थात् स्वयं उस विषय पर विचार करना।

२. निबन्ध-लेखन में इन बातों का सदा ध्यान रखें :—१. प्रस्तावना या आरम्भ—प्रारम्भ में विषय का निर्देश, उसका लक्षण आदि रखें। २. विवेचन—बीच में विषय का विस्तृत विवेचन करें। उस वस्तु के लाभ, हानि, गुण, अवगुण, उपयोगिता, अनुपयोगिता आदि का विस्तृत विचार करें। अपने कथन की पुष्टि में सूक्ति, पद्य या श्लोक उद्धरणरूप में दे सकते हैं। ३. उपसंहार—अन्त में अपने कथन का सारांश संक्षेप में दें। प्रस्तावना और उपसंहार एक या दो सन्दर्भ (पैराग्राफ) में ही हों। अधिक स्थान विवेचन में दें।

३. निबन्ध की शैली के विषय में इन बातों का ध्यान रखें :—१. भाषा व्याकरण की दृष्टि से शुद्ध हो। २. भाषा प्रारम्भ से अन्त तक एक-सी हो। ३. भाषा में प्रवाह हो, स्वाभाविकता हो। ४. उपयुक्त और असंदिग्ध शब्दों का प्रयोग करें। ५. भाषा सरल, सरस, सुबोध और आकर्षक हो। ६. लोकोक्ति एवं अलंकारों को भी स्थान दें। ७. अनावश्यक विस्तार, पुनरुक्ति, पाण्डित्य-प्रदर्शन तथा क्लिष्टता का त्याग करें।

४. निबन्ध के मुख्यतया तीन भेद हैं :—

१. वर्णनात्मक निबन्ध—इनमें पशु, पक्षी, नदी, ग्राम, नगर, पर्वत, समुद्र, ऋतु-वर्णन, यात्रा, पर्व, रेल, तार, विमान आदि का स्पष्ट एवं विस्तृत वर्णन होता है।

२. विवरणात्मक निबन्ध—इनमें घटित घटनाओं, युद्धों, प्राचीन कथाओं, ऐतिहासिक वर्णनों, जीवन-चरितों आदि का संग्रह होता है।

३. विचारात्मक निबन्ध—इनमें आध्यात्मिक, मनोविज्ञान-सम्बन्धी, सामाजिक, राजनीतिक तथा अमूर्त विषयों, चिन्ता, क्रोध, अहिंसा, सत्य, परोपकार, आदि का संग्रह होता है। इन निबन्धों में इन विषयों के गुण, दोष, लाभ, हानि आदि का विचार होता है।

उदाहरण के लिए २० निबन्ध अतिप्रसिद्ध विषयों पर सरल संस्कृत में दिये जाते हैं।

१. विद्याविहीनः पशुः । (विद्या)

[१. प्रस्तावना, २. विद्याया लाभाः, ३. विद्यांया महत्त्वम्, ४. विद्याप्राप्तेरुपायाः, ५. उपसंहारः ।]

ज्ञानार्थकविद्धातोः विद्याशब्दः सिध्यति । यस्य कस्यचिदपि वस्तुनः सम्यक्तया ज्ञानं विद्येति कथ्यते । वेददर्शनसाहित्यविज्ञानादीनां विषयाणां पठनं सम्यग् ज्ञानं च विद्येति अभिधीयते ।

यद्यपि संसारे बहूनि वस्तूनि सन्ति, परन्तु विद्यैव सर्वश्रेष्ठं धनमस्ति । अत एवोच्यते—'विद्याधनं सर्वधनप्रधानम्' । विद्यया मनुष्यः स्वकीय कर्तव्यं जानाति । विद्ययैव मनुष्यो जानाति यत् को धर्मः, कोऽधर्मः, किं कर्तव्यम्, किम् अकर्तव्यम्, किं पुण्यम्, किं पापम्, किं कृत्वा लाभो भविष्यति, केन कार्येण वा हानिः भविष्यति । स विद्याप्राप्त्या सन्मार्गम् अनुवर्तितुं प्रयतते । एवं विद्ययैव मनुष्यो मनुष्योऽस्ति । यो मनुष्यो विद्याहीनोऽस्ति स कर्तव्याकर्तव्यस्य अज्ञानात् पशुवद् आचरति, अतः स पशुरित्यभिधीयते । 'विद्याविहीनः पशुः' इति ।

विद्या सर्वेषु धनेषु श्रेष्ठमस्ति, यतो हिं विद्यैव व्यये कृते वर्धते । अन्यद् धनं व्यये कृते क्षयं प्राप्नोति । अत एवोक्तम्—

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति संचयात् ॥१॥

न चोरहार्यं न च भ्रातृभाज्यं, न राजहार्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं, विद्याधनं सर्वधनप्रधानम् ॥२॥

विद्यैव जगति मनुष्यस्य उन्नतिं करोति । दुःखेषु विपत्तिषु च तस्य रक्षां करोति । विद्यैव कीर्तिं धनं च ददाति । विद्या वस्तुतः कल्पलता विद्यते ।

मातेव रक्षति पितेव हिते नियुङ्क्ते, कान्तेव चाभिरमयत्यपनीय खेदम् ।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं, किं किं न साधयति कल्पलतेव विद्या॥३॥

विद्ययैव मनुष्यः सर्वत्र संमानं प्राप्नोति । राजानोऽपि तस्य पुरस्तात् नतशिरसो भवन्ति । विद्वांस एव संसारस्य दुःखानि दूरीकुर्वन्ति । त एव उपदेशका विचारका ऋषयो महर्षयो मन्त्रिणो नेतारश्च भवन्ति । विद्वांस एव विविधान् आविष्कारान् कृत्वा संसारस्य श्रियं वर्धयन्ति, लोकान् च सुखिनः कुर्वन्ति । अतः सर्वैरपि आलस्यप्रमादादिकं त्यक्त्वा विद्याध्ययनम् अवश्यं कर्तव्यम् । विद्ययैव मोक्षप्राप्तिः भवति । उक्तं च—'ऋते ज्ञानान्न मुक्तिः' ।

२. सत्यमेव जयते नानृतम् । (सत्यम्)

[(१) प्रस्तावना, (२) सत्यस्योपयोगिता, (३) दृष्टान्ताः, (४) सत्यत्यागे हानयः, (५) उपसंहारः ।]

सते अर्थात् कल्याणाय हितं सत्यं भवति। यद् वस्तु यथा विद्यते, तस्य तेनैव रूपेण कथनं प्रकाशनं लेखनं वा सत्यमिति अभिधीयते। परमेश्वरेण जिह्वा सदुपयोगार्थं दत्ता, अतः जिह्वायाः सदुपयोगः सत्यभाषणेन कर्तव्यः।

जगति सत्यस्य यादृशी आवश्यकता विद्यते, न तादृशी अन्यस्य कस्यचिद् वस्तुनः। सत्येनैव समाजस्य स्थितिः वर्तते। यदि सर्वेऽसत्यवादिनो भवेयुस्तर्हि न लोकस्य स्थितिः क्षणमात्रमपि भवितुं शक्नोति। सत्यस्यैव एष महिमा यद् वयं समाजे मनुष्येषु विश्वासं कुर्मः। अतः सिध्यति यत् सत्यं लोकस्याधारोऽस्ति। अत एवोच्यते—

गोभिर्विप्रैश्च वेदैश्च सतीभिः सत्यवादिभिः।
अलुब्धैर्दानशूरैश्च सप्तभिर्धार्यते मही ॥१॥

सत्यभाषणेन मनुष्यो निर्भीको भवति। सत्यभाषणेन तस्य तेजो यशः कीर्तिः विद्या गौरवं च वर्धन्ते। यः सत्यं वदति, स सर्वेभ्यः पापेभ्योऽपि निवृत्तो भवति। यदा स कस्मिंश्चित् पापे प्रवर्तते, तदा स चिन्तयति यद् अहं सत्यमेव वदिष्यामि, अतः सर्वेषां दृष्टिषु हीनो भविष्यामि, एवं स पापाद् विरमति। सत्यभाषणं वस्तुतो जीवने सर्वोत्तमं तपो वर्तते। अत एवोक्तम्—

अश्वमेधसहस्रं च सत्यं च तुलया धृतम्।
अश्वमेधसहस्राद् हि सत्यमेव विशिष्यते ॥२॥

सत्यस्य प्रतिष्ठयैव संसारस्य कल्याणम्, अभ्युदयः, उन्नतिश्च भवन्ति। यः कश्चित् सत्यमाश्रयति, तस्य जीवनं सफलं भवति। अत उच्यते—'सर्वं सत्ये प्रतिष्ठितम्'। ये सत्यं पालयन्ति, ते सर्वोत्तमं धर्मं कुर्वन्ति। ये च सत्यं परित्यज्य असत्यं भजन्ते, ते महापातकं कुर्वन्ति। यतो हि असत्यभाषणेन स्वस्य हानिः नाशश्च भवतः। समाजस्य देशस्य लोकस्य च मिथ्याभाषणेन नाशो भवति। अत एवोच्यते—नहि सत्यात् परो धर्मो नानृतात् पातकं परम्।

सत्यस्य पालनार्थमेव महाराजो दशरथः प्रियं पुत्रं रामं वनं प्रैषयत्। राजा हरिश्चन्द्रः सत्यपालनार्थमेव सर्वाणि दुःखानि असहत। युधिष्ठिरः सत्यभाषणस्य प्रभावादेव विजयमलभत। महात्मा गांधिमहोदयः सत्यस्यैव सदा शिक्षामदात्। भारतस्य राजचिह्नेऽपि 'सत्यमेव जयते' इत्यादरेण उल्लिख्यते।

अतः सर्वैरपि लौकिकपारलौकिकाभ्युदयाय सत्यमेव सदा भाषणीयम्।

३. अहिंसा परमो धर्मः । (अहिंसा)

[१. प्रस्तावना, २. अहिंसाया उपयोगिता लाभाश्च, ३. दृष्टान्ताः, ४. हिंसाया दोषाः, ५. उपसंहारः ।]

हिंसनं हिंसेति । कस्यापि पीडनं दुःखदानं वा हिंसेति कथ्यते । हिंसा त्रिविधा भवति—मनसा, वाचा, कर्मणा च । मनुष्यो यदि कस्यचित् जनस्य अशुभं हानिं वा चिन्तयति, सा मानसिकी हिंसा वर्तते । यदि कठोरभाषणेन, कटुप्रलापेन, दुर्वचनेन, असत्यभाषणेन वा कमपि दुःखितं करोति, तर्हि सा वाचिकी हिंसा भवति । यदि जनः कस्यापि जीवस्य हननं करोति, ताडनादिना वा दुःखं ददाति, तर्हि सा कायिकी हिंसा भवति । एतासां तिसृणां हिंसानां परित्यागोऽहिंसेति निगद्यते ।

संसारेऽहिंसाया महती उपयोगिता वर्तते । गवादीनां पशूनां यदि हनन न स्यात्तर्हि देशे धनधान्यस्य दुग्धादीनां च न्यूनता न स्यात् । अहिंसया पशवोऽपि मनुष्येषु प्रेम कुर्वन्ति । शत्रवोऽपि अहिंसया मित्राणि भवन्ति । मनुष्यस्य आत्माऽपि अहिंसया सुखमनुभवति । अहिंसायाः प्रतिष्ठायां सर्वे सर्वत्र ससुखं निर्भयं च विचरन्ति । एतत्तु सर्वैरनुभूयते एव यत् न कोऽपि जगति स्वविनाशमिच्छति । सर्वे जनाः सुखमिच्छन्ति । यदि एवमेव पशुपक्षिणामपि विषये चिन्त्येत तर्हि न कस्यचिद् हननं कश्चित् करिष्यति । अत एव ऋषिभिः महर्षिभिश्च 'अहिंसा परमो धर्म' इत्यङ्गीकृतः । उच्यते च--

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥१॥
आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः ॥२॥
आत्मवत्सर्वभूतेषु यः पश्यति स पश्यति ॥३॥

अहिंसैव धर्ममार्गः । अतएव भगवान् बुद्धः, भगवान् महावीरः, महात्मा गान्धिमहोदयश्च अहिंसाया एवोपदेशं दत्तवन्तः । अहिंसायाः प्रचारे एवैतेषां जीवनं व्यतीतम् । महात्मनो गांधिमहोदयस्य संरक्षणे अहिंसाशस्त्रेणैव भारतवर्ष पराधीनतापाशं छित्वा स्वतन्त्रतामलभत । अहिंसाशस्त्रेणैव भीता विदेशीया भारतं त्यक्त्वा पलायिताः । एषोऽहिंसाया एव महिमाऽस्ति ।

यदि संसारे हिंसायाः प्रसारः स्यात् तदा न कोऽपि मनुष्यो देशो वा संसारे सुखेन शान्त्या च स्थातुं शक्नोति । हिंसया मनुष्यः क्रूरः निर्दयः सद्भावहीनश्च भवति । हिंसके सत्यं त्यागः तपस्या दया क्षमा प्रेम पवित्रता विमलबुद्धिश्च न भवन्ति ।

अतः सर्वैरपि सर्वदा सर्वभावेन अहिंसाधर्मः पालनीयः, लोकस्य च कल्याणं कर्तव्यम् ।

४. परोपकाराय सतां विभूतयः। (परोपकारः)

[१. प्रस्तावना, २. परोपकारस्य लाभाः, गुणाः, महत्त्वं च, ३. दृष्टान्ताः, ४. उपसंहारः।]

परेषाम् उपकारः परोपकारोऽस्ति। अन्येभ्यो मनुष्येभ्यो जीवेभ्यो वा तेषां हितसम्पादनार्थं यत् किंचिद् दीयते, तेषां साहाय्यं वा क्रियते, तत् सर्वं परोपकारशब्देन गृह्यते।

संसारे परोपकार एव स गुणो विद्यते, येन मनुष्येषु जीवेषु वा सुखस्य प्रतिष्ठा वर्तते। समाजसेवाया भावना, देशप्रेमभावना, देशभक्तिभावना, दीनोद्धरणभावना, परदुःखकातरता, सहानुभूतिगुणस्य सत्ता च परोपकारगुणस्य ग्रहणेनैव भवति। परोपकारकरणेन हृदयं पवित्रं सत्त्वभावसमन्वितं सरलं विनयोपेतं सरसं सदयं च भवति। परोपकारिणः परेषां दुःखं स्वीयं दुखं मत्वा तन्नाशाय यतन्ते। ते दीनेभ्यो दानं ददति, निर्धनेभ्यो धनम्, वस्त्रहीनेभ्यो वस्त्रम्, पिपासितेभ्यो जलम्, बुभुक्षितेभ्योऽन्नम्, अशिक्षितेभ्यश्च शिक्षाम्। सज्जनाः परोपकारेणैव प्रसन्ना भवन्ति। ते परोपकरणे स्वीयं दुःखं न गणयन्ति। उच्यते च—

श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः खलु सज्जनानां, परोपकारेण न चन्दनेन ॥१॥

प्रकृतिरपि परोपकारस्यैव शिक्षां ददाति। परोपकारार्थमेव सूर्यः तपति, चन्द्रो ज्योत्स्नां वितरति, वृक्षाः फलानि वितरन्ति, नद्यो वहन्ति, मेघाश्च वर्षन्ति। उक्तं च—

परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः, परोपकारार्थमिदं शरीरम् ॥२॥
भवन्ति नम्रास्तरवः फलोद्गमैः, नवाम्बुभिर्भूरिविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः, स्वभाव एवैष परोपकारिणम् ॥३॥

शास्त्रेषु परोपकारस्य बहु महत्त्वं गीतमस्ति। परोपकारः सर्वेषामुपदेशानां सारो वर्तते। परोपकारेणैव जगतोऽभ्युदयो भवति, शान्तिः सुखं च वर्धेते। उक्तं च—

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम् ॥४॥

परोपकारभावनयैव महाराजो दधीचिः देवानां हिताय स्वीयानि अस्थीनि ददौ। महाराजः शिविः कपोतरक्षणार्थं स्वमांसं श्येनाय प्रादात्। महर्षिः दयानन्दः, महात्मा गांधिश्च भारतभूमिहितायैव प्राणान् दत्तवन्तौ। अतः सर्वैरपि सर्वदा सर्वथा परोपकारः करणीयः। निगदितं चैतत्—

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥५॥
परोपकारः कर्तव्यः प्राणैरपि धनैरपि।
परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि ॥६॥

५. उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः। (उद्योगः)

[१. प्रस्तावना, २. उद्योगस्योपयोगिता, लाभाश्च, ३. दृष्टान्ताः, ४. अनुद्योगेन हानयः, ५. उपसंहारः।]

संसारे सर्वेऽपि जनाः सुखं शान्तिं चेच्छन्ति। सुखं शान्तिश्च विना उद्योगेन पुरुषार्थेन वा न सिध्यतः। उद्योगेनैव मनुष्यो धनं विद्यां कलासु कुशलतां च लभते। येऽनुद्योगिनः सन्ति, ते सुखं शान्तिं समृद्धिं च न जातु लभन्ते। अत उच्यते—

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या, यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥१॥

भगवद्गीतायां भगवता कृष्णेन प्रतिपादितमेतद् यद् मनुष्यैः संसारेऽवश्यमेव कर्म कर्तव्यम्। अकर्मणि कदापि प्रवृत्तिर्न कर्तव्या। पुरुषार्थेनैव जीवनं चलति।

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥२॥

संसारेऽनुद्योग आलस्यं वा मनुष्यस्य महाशत्रुः वर्तते, येन मनुष्यः सदा दुःखं प्राप्नोति। उद्यमिन एव दुःखानि त्यक्त्वा सुखं समृद्धिं च प्राप्नुवन्ति। उक्तं च—

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥३॥

जगति दृश्यते एतद्यद् जनाः सर्वविधसुखं कांक्षन्ति, परन्तु तदर्थं यत्नं न कुर्वन्ति। विना प्रयत्नेन किंचिदपि कदाचिदपि न सिध्यतीति सुनिश्चितम्। अत एवोक्तम्—

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥४॥
योजनानां सहस्रं तु शनैर्गच्छेत् पिपीलिका।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥५॥

उद्यमेनैव निर्धना धनिनो भवन्ति, अज्ञानिनो ज्ञानवन्तः, अकुशलाः कुशलाः, निर्बलाः सबलाः, दीनाः हीनाश्च सर्वविधसम्पत्तिसमन्विताः भवन्ति। महाकविः कालिदास उद्यमेनैव कविकुलगुरुः बभूव, वाल्मीकिव्यासादयश्च कविवराः संजाताः। सर्वमुद्योगेनैव सिध्यति। अनुद्योगेन भाग्यनिर्भरतया च दुःखमेव प्राप्नोति। अतः सर्वैः सर्वदा उद्योगः करणीयः। परेशोऽपि उद्योगिन एव साहाय्यं करोति। उक्तं च—

न दैवमिति संचिन्त्य त्यजेदुद्योगमात्मनः।
अनुद्योगेन तैलानि तिलेभ्यो नाप्तुमर्हति ॥६॥
उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र साहाय्यकृद् विभुः ॥७॥

६. धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् । (आरोग्यम्)

[१. प्रस्तावना, २. आरोग्यस्योपयोगिता, लाभाः, प्रकाराश्च, ३. तदभावे दोषाः, ४. उपसंहारः ।]

संसारे सर्वे जनाः सुखार्थं प्रयतन्ते । मनुष्यः तदैव सुखी भवति, यदा स नीरोगो भवति । तदैव स प्रयत्नं पुरुषार्थमपि कर्तुं शक्नोति । यो मनुष्यो रुग्णो वर्तते, यस्य शरीरे वा शक्तिर्नास्ति, स कथमपि संसारस्य सुखमनुभवितुं न शक्नोति । शरीरस्यारोग्यं नीरोगता वा व्यायामेन भवति । स्वस्था एव जनाः सर्वमपि कार्यकलापं धर्मादिकं च कुर्वन्ति । अत एवोक्तं महाकविना कालिदासेन—

शरीरमाद्यं खलु धर्मसाधनम् ।

स्वास्थ्यस्योपयोगिता सर्वत्रैव दृश्यते । ये स्वस्था हृष्टाः पुष्टाश्च भवन्ति, ते सोत्साहं स्वीयं कर्म कुर्वन्ति । ते न कुतश्चिद् भीता भवन्ति । सभासु समाजेषु च तेषां शरीरं वीक्ष्य जनाः प्रसन्ना भवन्ति । ये रुग्णा निर्बला भवन्ति, ते सर्वत्र हीनदृष्ट्याऽवलोक्यन्ते । तेषां सर्वत्रापमानो भवति । ते निर्बलत्वात् सदा दुःखमेव लभन्ते । अतो यथा विद्याध्ययनादिकमावश्यकम्, तथैव स्वास्थ्यरक्षापि अतीवावश्यकी विद्यते ।

स्वास्थ्यलाभाय व्यायामा बहुविधाः सन्ति । भ्रमणं धावनं क्रीडनं तरणम् अश्वारोहणं मल्लयुद्धम् इत्यादयः । बालकेभ्यः क्रीडनं धावनं तरणं च विशेषतो हितकराणि सन्ति । क्रीडासु च पादकन्दुकेन क्रीडनं, यष्टिकया (हॉकी) क्रीडनम्, करकन्दुकेन (वॉली बॉल) वा क्रीडनं विशेषतो रुचिकरं स्वास्थ्यवर्धकं चास्ति । प्रातः सायं च भारतीया व्यायामा अपि करणीयाः, यथा—दण्डसाधनम् (डंड), उत्थानोपवेशनक्रिया (बैठक), योगासनेषु च कानिचिदासनानि । योगासनेषु पश्चिमोत्तानासनं मयूरासनं शरीरासनं धनुरासनं सर्वांगासनं शीर्षासनं च सर्वेभ्य एव मनुष्येभ्यः स्वास्थ्यलाभाय विशेषतो हितकराणि सन्ति । बालिकाभ्यः स्त्रीभ्यश्च भ्रमणं विशेषोपयोगि वर्तते । युवकेभ्योऽश्वारोहणमपि हितकरमस्ति । वृद्धेभ्यो भ्रमणं योगासनानि च लाभप्रदानि सन्ति । प्राणायामस्तु सर्वैरपि अवश्यमेव स्वास्थ्यलाभाय करणीयः । अन्ये व्यायामाः शक्त्यनुसारं करणीयाः । स्वास्थ्यलाभाय शरीरस्य स्वच्छताऽपि अत्यावश्यकी वर्तते । अतः प्रतिदिनं स्नानमपि अवश्यं करणीयम् ।

सर्वैश्वर्यसमन्विताः धनधान्यपरिपूर्णा अपि जनाः स्वास्थ्यस्याभावे स्वकीयस्य ऐश्वर्यस्य सुखं नानुभवितुं शक्नुवन्ति । अतः सर्वैरपि स्वास्थ्यलाभाय नीरोगतायै च प्रतिदिनमवश्यं व्यायामः करणीयः ।

७. आचारः परमो धर्मः। (सदाचारः)

[१. प्रस्तावना, २. सदाचारस्योपयोगिता, लाभाः, तत्साधनोपायाः, ३. दृष्टान्ताः, ४. उपसंहारः।]

सताम् आचार सदाचारः इत्युच्यते। सज्जनाः विद्वांसो यथा आचरन्ति तथैव आचरणं सदाचारो भवति। सज्जनाः स्वकीयानि इन्द्रियाणि वशे कृत्वा सर्वैः सह शिष्टतापूर्वकं व्यवहारं कुर्वन्ति। ते सत्यं वदन्ति, असत्यभाषणाद् विरमन्ति, मातुः पितुः गुरुजनानां वृद्धानां ज्येष्ठानां च आदरं कुर्वन्ति, तेषाम् आज्ञां पालयन्ति, सत्कर्मणि प्रवृत्ता भवन्ति, असत्कर्मभ्यश्च निवृत्ता भवन्ति। तद्वत् आचरणेन मनुष्यः सदाचारी धार्मिकः शिष्टो विनीतो बुद्धिमान् च भवति।

सदाचारस्य सत्तयैव संसारे जन उन्नतिं करोति। देशस्य राष्ट्रस्य समाजस्य जनस्य च उन्नत्यै सदाचारस्य महती आवश्यकता वर्तते। सदाचारेणैवं जना ब्रह्मचारिणो भवन्ति। सदाचारेणैव शरीरं परिपुष्टं भवति। सदाचारेण बुद्धिः वर्धते। सदाचारेणैव मनुष्यः परोपकारकरणं सत्यभाषणम् अन्यच्च सत्कर्म कर्तुं प्रवृत्तो भवति। सदाचारी न पापानि चिन्तयति, अतः तस्य बुद्धिः निर्मला भवति। निर्मलबुद्धिश्च लोकस्य देशस्य च हित-चिन्तने प्रवृत्तो भवति। अत एव पूर्वैः महर्षिभिः 'आचारः परमो धर्मः' इत्युक्तम्। संसारे सदाचारस्यैव महत्त्वं दृश्यते। ये सदाचारिणो भवन्ति, त एव सर्वत्र आदरं लभन्ते। महाभारतेऽपि अत एवोक्तं यद् मनुष्यैः सदा स्ववृत्तस्य रक्षा कार्या, धनमायाति याति च। यः सदाचारेण हीनोऽस्ति स वस्तुतः पतितोऽस्ति, धनहीनो न पतितोऽस्ति।

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥१॥

ब्रह्मचर्यस्य वेदेऽपि महिमा वर्णितोऽस्ति यद् ब्रह्मचर्यस्य सदाचारस्य वा महिम्ना देवा मृत्युमपि स्ववशेऽकुर्वन्।

ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नत ॥२॥

मनुष्यस्तदा सच्चरित्रो भवति यदा स मातृवत् परदारेषु व्यवहरति, कन्याः बालिकाश्च स्वभगिनीवत् पश्यति। कामवासनां निगृह्य संयत इवाचरति। यो नैवमाचरति स दुश्चरित्रः दुराचार इति कथ्यते।

सदाचारपालनेनैव श्रीरामचन्द्रो मर्यादापुरुषोत्तमोऽभवत्। एतदर्थमेव लक्ष्मणेन शूर्पणखाया नासिका छिन्ना। सदाचाराभावेनैव चतुर्वेदविदपि रावणो राक्षस इति कथ्यते। अतः सर्वैः स्वोन्नत्यै सदा सदाचारः पालनीयः।

८. सत्संगतिः कथय किं न करोति पुंसाम् । (सत्संगतिः)

[१. प्रस्तावना, २. सत्संगतेरुपयोगिता लाभाश्च, ३. तदभावे दोषाः, ४. उपसंहारः ।]

सतां सज्जनानां संगतिः सत्संगतिः कथ्यते । ये सज्जनाः साधवः पवित्रात्मनाः सन्ति, तेषां संगत्या मनुष्यः सज्जनः साधुः शिष्टश्च भवति । ये दुर्जनाः सन्ति तेषां संगत्या मनुष्यो दुर्जनो भवति, पतनं विनाशं च प्राप्नोति । ये सज्जनैः सह उपविशन्ति उत्तिष्ठन्ति खादन्ति पिबन्ति च, ते तथैव स्वभावं धारयन्ति । मनुष्यस्योपरि संगतेः महान् प्रभावो भवति । यादृशैः पुरुषैः सह स निवसति, तादृश एव स भवति । अत एवोच्यते—

संसर्गजा दोषगुणा भवन्ति ॥१॥

हीयते हि मतिस्तात हीनैः सह समागमात् ।
समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ॥२॥

सज्जनानां संगत्या मनुष्य उन्नतिं प्राप्नोति । तस्य विद्या कीर्तिश्च वर्धेते । अतएव नीतिकारैः वारंवारम् एतदुक्तमस्ति यत्—

सद्भिरेव सहासीत सद्भिः कुर्वीत संगतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किंचिदाचरेत् ॥३॥
पण्डितैः सह सांगत्यं पण्डितैः सह संकथाः ।
पण्डितैः सह मित्रत्वं कुर्वाणो नावसीदति ॥४॥

बाल्यकाले विशेषतो बालकस्योपरि संसर्गस्य प्रभावो भवति । बालको यादृशैः बालकैः सह संगतिं करिष्यति तादृश एव भविष्यति । अतो बाल्यकाले दुर्जनैः सह संगतिः कदापि न करणीया । दुर्जनानां संसर्गेण बहवो हानयो भवन्ति, यथा—दुर्जनसंसर्गेण मनुष्योऽसद्-वृत्तो भवति, दुर्विचारयुक्तो भवति, तस्य बुद्धिर्दूषिता भवति, अतः बुद्धिः क्षीयते, दुर्व्यसनग्रस्तो भवति, अतस्तस्य शरीरं क्षीणं निर्बलं च भवति, तस्य कीर्तिः नश्यति, सर्वत्रानादरो भवति, सर्वत्राप्रतिष्ठाभाजनं च भवति ।

अतः स्वयशोवृद्धये ज्ञानवृद्धये सुखस्य शान्तेश्च प्राप्तये सर्वैरपि सर्वदा सत्संगतिः करणीया, दुर्जनसंगतिश्च हेया । अत एव सत्संगतिमाहात्म्ये एवम् उच्यते—

जाड्यं धियो हरति सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्संगतिः कथय किं न करोति पुंसाम् ॥५॥

९. संघे शक्तिः कलौ युगे । (एकता)

[१. प्रस्तावना, २. एकताया उपयोगिता लाभाश्च, तत्साधनोपायाः, ३. तदभावे दोषाः, ४. उपसंहारः ।

एकमुद्देश्यं लक्ष्यीकृत्य बहूनां जनानाम् एकत्वभावनया कार्यकरणम् 'एकता' इत्युच्यते । एकता मनुष्ये शक्तिमादधाति, एकतयैव देशः समाजो लोकश्च उन्नतिपथं प्राप्नुवन्ति । यस्मिन् देशे समाजे वा एकताऽस्ति, स एव देशः सकललोकसम्माननीयो भवति ।

संसारे एकतायाः अतीवावश्यकता वर्तते, विशेषतश्चाद्यत्वे । अद्यत्व संसारे यस्मिन् राष्ट्रे एकताया अभावोऽस्ति, तद् राष्ट्रं सद्य एव परतन्त्रतापाशबद्धं भवति । भारतवर्षम् एवैकताया अभावात् कतिपयवर्षपूर्वं यावत् पराधीनं आसीत् । यदा भारतीयेषु एकता-भावनाया जागृतिरभूत्, तदा ते स्वाधीनतामलभन्त । अत एवोच्यते—'संघे शक्तिः कलौ युगे ।'

ऋग्वेदस्यान्तिमसूक्ते एकताया महत्यावश्यकता महत्त्वं च प्रतिपादिते वर्तेते । सर्वे जना एकत्वभावनया युक्ताः स्युः । तेषां गमनं भाषणं मनांसि हृदयानि संकल्पा विचाराः मन्त्रणादिकम् चैकत्वभावेनैव प्रेरितानि स्युः । एवंकरणेनैव जगति सुखस्य शान्तेश्च संप्राप्तिः संभवति । उक्तं च—

> सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ॥ १ ॥
> समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम ।
> समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥ २ ॥
> समानी व आकूतिः समाना हृदयानि वः ।
> समानमस्तु वो मनो यथा वः सुसहासति ॥ ३ ॥

हितोपदेशे मित्रलाभप्रकरणे एकताया लाभाः साधु प्रतिपादिताः सन्ति । क्षुद्राणि तृणानि यदा रज्जुभावं प्राप्नुवन्ति, तदा गजोऽपि तेन बन्द्धुं शक्यते । जलबिन्दुसमूह एव नदी सागरश्च भवति । मृत्तिकाकणसमूह एव महापर्वतो भवति । तन्तुसमूह एव सुदृढः पटो भवति । इत्येष एकताया एव महिमा । अत एवोक्तम्—'संहतिः श्रेयसी पुंसाम् ।'

> अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
> तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥४॥

यत्रैकताया अभावोऽस्ति, तत्र क्षयो नाशो विनाशोऽधोगतिः हानिश्च दृश्यन्ते । अतः सुखशान्तिसमृद्धिप्राप्त्यै एकता धारणीया । उक्तं चापि महाभारते —

> न वै भिन्ना जातु चरन्ति धर्मं, न वै सुखं प्राप्नुवन्तीह भिन्नाः ।
> न वै भिन्ना गौरवं प्राप्नुवन्ति, न वै भिन्नाः प्रशमं रोचयन्ति ॥५॥

१०. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

[१. प्रस्तावना, २. मातृभक्तेः देशभक्तेश्चोपयोगिता, लाभाश्च, ३. तदभावे दोषाः, ४. उपसंहारः ।]

अस्मिन् संसारे माता मातृभूमिश्च एवैते सर्वोत्तमे स्तः । बालकस्योपरि मातुः यादृशं नैसर्गिकं प्रेम भवति, न तादृशं क्वापि शक्यते । माता बालकस्य कृते सर्वस्वमपि त्यक्तुं शक्नोति । मातुः सर्वदैव एषेच्छा भवति यद् बालकः सदा सुखी समृद्धो गुणगणविभूषितश्च भवेत् । सा स्वीयं कष्टजातं नैव चिन्तयति, बालकस्य सुखचिन्तैव सदा तस्याः समक्षं भवति । अतएव पुत्रस्यापि मातुरुपरि नैसर्गिकमसाधारणं च प्रेम भवति । स बाल्यकालात् प्रभृति मातरमेव सर्वतोऽधिकं मन्यते । बालकस्य कृते मातैव सर्वस्वमस्ति । मनुष्यः कदाचिदपि मातुरनृणतां प्राप्तुं न शक्नोति । अत एवोपनिषत्सु आदिश्यते— 'मातृदेवो भव' । अत एव मनुनाऽप्युक्तम्—

यं मातापितरौ क्लेशं सहेते संभवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥

अत एव मनुष्यैः मातृपूजा मातृभक्तिश्च सर्वदा करणीया ।

यो मनुष्यो यत्र जन्म लभते, सा तस्य जन्मभूमिः । जन्मभूमिः मनुष्यस्य सर्वदैव आदरस्य पात्रं भवति । यत्र कुत्रापि गतो मनुष्यो जन्मभूमिं सदा स्मरत्येव, तद्दर्शनस्याभिलाषः तस्य हृदये वर्तते । भारतवर्षमिदमस्माकं जन्मभूमिः । भारतवर्षञ्चास्माकं देशः । स्वदेशस्य कृते सर्वेषां हृदये संमान आदरश्च भवतः । अद्यत्वे संसारे सर्वे देशाः स्वदेशस्योन्नतिसाधने संलग्नाः सन्ति । ते साभिमानमेतद् वदन्ति यद् वयम् एतद्देशीयाः स्मः । वयं भारतीया अपि साम्प्रतं स्वाधीनाः स्मः । सर्वस्मिन् संसारे भारतवर्षस्य साम्प्रतमादरो भवति ।

देशस्योन्नत्यै देशभक्तिभावनाया महत्यावश्यकता भवति । देशभक्तिभावनयैव मनुष्यो देशस्योन्नत्यै यतते, समाजस्योद्धारं करोति, अशिक्षितान् शिक्षितान् करोति, देशस्य दरिद्रतां हीनावस्थां च दूरीकरोति, स्वदेशीयव्यापारस्योन्नतिं करोति, स्वदेशनिर्मितानि वस्तूनि उपयुङ्क्ते, आवश्यकतायां सत्यां स्वकीयान् प्राणानपि मातृभूमिरक्षार्थे परित्यजति । यदा सर्वेष्वपि देशवासिषु एतादृशी भावना भवति, तदा देशो नूनमुन्नतिं प्राप्नोति । भारतीयेषु स्वदेशाभिमानः सर्वदा आसीत्, अस्ति च । अस्माभिरपि देशभक्तैः भाव्यम्, देशस्य चोन्नतिः करणीया । लक्ष्यं च स्यात्—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

११. संस्कृतभाषायाः महत्त्वम् ।

[१. प्रस्तावना, २. संस्कृतभाषाया उपयोगिता, महत्त्वं लाभाश्च, ३. तत्साहित्यम्, ४. उपसंहारः ।]

संस्कृता परिष्कृता परिशुद्धा व्याकरणसम्बन्धिदोषादिरहिता भाषा संस्कृतभाषेति निगद्यते । सर्वविधदोषशून्यत्वादियं भाषा देवभाषा, गीर्वाणगीः इत्यादिभिः शब्दैः संबोध्यते । अतोऽन्या भाषा प्राकृतभाषापदवीं प्राप्ता ।

संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा सर्वोत्तमसाहित्यसंयुक्ता चास्ति । संस्कृतभाषाया उपयोगिता एतस्मात् कारणाद् वर्तते यद् एषैव सा भाषाऽस्ति यतः सर्वासां भारतीयानाम् आर्यभाषाणाम् उत्पत्तिर्बभूव । सर्वासामेतासां भाषाणाम् इयं जननी । सर्वभाषाणां मूलरूपज्ञानाय एतस्या आवश्यकता भवति । प्राचीने समये एषैव भाषा सर्वसाधारणा आसीत् , सर्वे जनाः सस्कृतभाषाम् एव वदन्ति स्म । अतः ईसवीयसंवत्सरात्पूर्वं प्रायः समग्रमपि साहित्यं संस्कृतभाषायामेव उपलभ्यते । संस्कृत-भाषायाः सर्वे जनाः प्रयोगं कुर्वन्ति स्म, इति तु निरुक्तमहाभाष्यादिग्रन्थेभ्यः सर्वथा सिद्धमेव । आधुनिकं भाषाविज्ञानमपि एतदेव सनिश्चयं प्रमाणयति ।

संस्कृतभाषायामेव विश्वसाहित्यस्य सर्वप्राचीनग्रन्थाः चत्वारो वेदाः सन्ति, येषां महत्त्वमद्यापि सर्वोपरि वर्तते । वेदेषु मनुष्याणां कर्तव्याकर्तव्यस्य सम्यक्तया निर्धारणं वर्तते । वेदानां व्याख्यानभूता ब्राह्मणग्रन्थाः सन्ति । तदनन्तरम् अध्यात्मविषयप्रतिपा-दिका उपनिषदः सन्ति, यासां महिमा पाश्चात्त्यैरपि निःसंकोचं गीयते । ततश्च भारत-गौरवभूताः षड्दर्शनग्रन्थाः सन्ति, ये विश्वसाहित्येऽद्यापि सर्वमान्याः सन्ति । ततश्च-श्रौतसूत्राणां गृह्यसूत्राणां, धर्मसूत्राणां, वेदस्य व्याख्यानभूतानां षडङ्गानां च गणना भवति । महर्षिवाल्मीकिकृतवाल्मीकीयरामायणस्य, महर्षिव्यासकृतमहाभारतस्य च रचना विश्वसाहित्येऽपूर्वा घटना आसीत् । सर्वप्रथमं विशदस्य कवित्वस्य, प्रकृतिसौन्दर्यस्य, नीतिशास्त्रस्य, अध्यात्मविद्यायाः तत्र दर्शनं भवति । तदनन्तरं कौटिल्यसदृशाः अर्थ-शास्त्रकाराः, भासकालिदासाश्वघोषभवभूतिदण्डिसुबन्धुबाणजयदेवप्रभृतयो महाकवयो नाट्यकाराश्च पुरतः समायान्ति, येषां जन्मलाभेन न केवलं भारतभूमिरेव, अपितु समस्तं विश्वमेतद् धन्यमस्ति । एतेषां कविवराणां गुणगणस्य वर्णने महाविद्वांसोऽपि असमर्थाः सन्ति, का गणना साधारणाना जनानाम् । भगवद्गीता, पुराणानि, स्मृतिग्रन्थाः अन्यद्विषयकं च सर्वं साहित्यं संस्कृतस्य माहात्म्यमेवोद्घोषयति ।

संस्कृतभाषैव भारतस्य प्राणभूता भाषाऽस्ति । एषैव समस्तं भारतवर्षमेकसूत्रे बध्नाति । भारतीयगौरवस्य रक्षणाय एतस्याः प्रचारः प्रसारश्च सर्वैरेव कर्तव्यः ।

१२. आर्याणां संस्कृतिः ।

[१. प्रस्तावना, २. आर्यसंस्कृतेः विशेषताः, तदुपयोगिता, महत्त्वं च, ३. उपसंहारः।]

संस्करणं परिष्करणं संस्कृतिः भवति । सा संस्कृतिः कथ्यते या दुर्गुणान् दुर्व्यसनानि पापानि पापभावनाश्च हृदयेभ्यो निस्सार्य हृदयानि निष्पापानि निर्मलानि सत्त्वभावोपेतानि च करोति । प्राचीनानाम् आर्याणां संस्कृतेः एता एव विशेषताः सन्ति । तेषां संस्कृतिः मनुष्यान् सर्वविधपापेभ्यो निवारयति, तान् सन्मार्गमुपनयति, तेषां हृदयेषु सत्यस्य अहिंसायाः धर्मस्य दयायाः परोपकारस्य धैर्यस्य त्यागस्य शीलस्य सहानुभूतेः दानादिगुणानां च स्थापनां करोति ।

आर्यसंस्कृतेः विशेषगुणाः संक्षेपत एते सन्तिः—१. **धर्मप्राधान्यम्**—'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति लक्षणानुसारं यतो लौकिकं पारलौकिकं च कल्याणं भवति, तदेव कर्म कर्तव्यम्, नान्यत् । धर्म एव मनुष्येषु पशुभ्यो विशेषोऽस्ति, इति तेषां मतम् । २. **वर्णव्यवस्था**—ब्राह्मणक्षत्रियवैश्यशूद्राः चत्वारो वर्णाः सन्ति । ते स्वं स्वं कर्म कुर्युः । वर्णव्यवस्था गुणकर्मानुसारं आसीत्, न तु जन्ममात्रेण । ३. **आश्रमव्यवस्था**—ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासाः चत्वारः आश्रमाः सन्ति, ते सर्वैरपि पालनीयाः । ४. **कर्मवादः**—मनुष्यः स्वकर्मानुसारं फलं प्राप्नोति, पुण्यकर्मणा पुण्यं पापकर्मणा च पापम् । 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' । 'पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनैवेति' (बृहदारण्यकम्) । ५. **पुनर्जन्मवादः**—मनुष्यस्य कर्मानुसारं पुनर्जन्म भवति । उक्तं च गीतायाम्—'जातस्य हि ध्रुवो मृत्युः, ध्रुवं जन्म मृतस्य च' । ६. **मोक्षः**—मनुष्यो ज्ञानाग्निना सर्वकर्माणि प्रदह्य मोक्षं लभते । मोक्षप्राप्तौ जीवस्य पुनरावृत्तिर्न भवति । मोक्ष एव परमः पुरुषार्थः । ७. **श्रुतीनां प्रामाण्यम्**—वेदाः परमप्रमाणभूताः सन्ति । वेदोक्तमार्गेण सदा प्रवर्तितव्यम् । ८. **यज्ञस्य महत्त्वम्**—सर्वैर्मनुष्यैः पञ्च यज्ञा अवश्यं कार्याः । ९. **अध्यात्मप्रवृत्तिः**—भौतिकवादं त्यक्त्वा अध्यात्मे प्रवृत्तिः कार्या । १०—**त्यागः**—जनः संसारे विषयेषु असक्तो भूत्वा कर्म कुर्यात् । यथा च गीतायां निष्कामकर्मयोगः प्रतिपादितः । उक्तं च वेदेऽपि 'तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम् ।' ११. **तपोमयं जीवनम्**—मनुष्याणां जीवनं तपोमयं स्यात्, न तु भोगप्रधानम् । १२. **तपोवनानां महत्त्वम्**—मनुष्यो ब्रह्मचर्यवानप्रस्थसंन्यासाश्रमकाले तपोवनं सेवेत । १३. **मातृपितृगुरुभक्तिः**—'मातृदेवो भव', 'पितृदेवो भव', 'आचार्यदेवो भव' इति । १४. **सत्यनिष्ठता**—सत्यमेव ग्राह्यम्, नासत्यम् । 'सत्यमेव जयते नानृतम्' इति । १५. **अहिंसापालनम्**—'अहिंसा परमो धर्मः' इति ।

एतस्मात् स्पष्टमेतदस्ति यदार्यसंस्कृत्यैव विश्वस्य कल्याणं भविष्यतीति ।

१३. गीताया उपदेशामृतम् ।

[१. प्रस्तावना, २. गीताया मुख्या उपदेशाः, तेषां व्यवहारोपयोगिता, लाभाश्च, ३. उपसंहारः ।]

महाभारतस्य युद्धे अर्जुनं विषण्णहृदयं दृष्ट्वा तस्य कर्तव्यबोधनार्थं भगवता कृष्णेन य उपदेशो दत्तः, स एव 'श्रीमद्भगवद्गीता' इति नाम्ना प्रसिद्धोऽस्ति । गीतायां भगवता कृष्णेन प्रायः सर्वमपि मनुष्यस्य आवश्यकं कर्तव्यं प्रतिपादितमस्ति । गीतायां ये उपदेशाः सन्ति, तेषां मुख्या एते सन्ति—

(१) अयमात्माऽजरोऽमरश्चास्ति । नायं जायते न च म्रियते । केनापि प्रकारेण नायं नाशं प्राप्नोति । यथा जीर्णवस्त्रमुत्तार्य नवं वस्त्रं धार्यते, तथैव नवशरीरधारणमस्ति ।

वासांसि जीर्णानि यथा विहाय, नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥१॥
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥२॥

आत्माऽयम् अजरोऽमरश्चास्ति । अतः कदाचिदपि शोको न करणीयः ।

(२) मनुष्यः स्वकर्मानुसारं पुनर्जन्म प्राप्नोति । मर्त्यः कर्मानुसारं म्रियते च ।

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥३॥

(३) मनुष्यैः सदा निष्कामभावनया कर्म करणीयम् । कर्म कदापि न त्याज्यम् ।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥४॥
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः ॥५॥

(४) सर्वैः मनुष्यैः सदा स्वकर्म पालनीयम् । स्वधर्मो न कदाचिदपि त्याज्यः ।

स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥६॥

(५) मनुष्यैः सदा स्वकीर्तिरक्षा करणीया । मरणं वरमस्ति, परन्तु न कीर्तिनाशः ।

संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥७॥

(६) शुभाशुभकर्मणः कदापि नाशो न भवति । शुभं कर्म सदा भयात् त्रायते ।

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥८॥

गीतायां ये उपदेशा दत्ताः सन्ति, ते सर्व एव जीवनस्योन्नतिकारकाः । गीताया उपदेशानुकूलम् आचरणं कृत्वा सर्वैरपि स्वजीवनमुन्नतं कर्तव्यम् । एतदर्थं गीतायाः पठनं पाठनं चापि कार्यम् । 'गीता सुगीता कर्तव्या' इति ।

१४. स्त्रीशिक्षाया आवश्यकता।

[१. प्रस्तावना, २. स्त्रीशिक्षाया आवश्यकता, लाभाः, हानयश्च, ३. स्त्रीशिक्षायाः रूपम्, ४. उपसंहारः।]

शिक्षा मनुष्ये स्वकर्तव्याकर्तव्यस्य ज्ञानमादधाति। शिक्षयैव जनाः शुभं कर्म कुर्वन्ति, अशुभं च परित्यजन्ति। शिक्षिता एव जना देशसेवां राष्ट्ररक्षां राष्ट्रसंचालनं पठनं पाठनं विज्ञानोन्नतिं च कुर्वन्ति। यथा पुरुषेभ्यः शिक्षा श्रेयस्करी वर्तते, तथैव स्त्रीभ्योऽपि शिक्षाया महती आवश्यकता वर्तते।

स्त्रीणां कृते शिक्षाया महती आवश्यकता एतस्मात् कारणाद् वर्तते यत् ता एव समये प्राप्ते मातरो भवन्ति। यथा मातरो भवन्ति, तथैव सन्ततिर्भवति। यदि मातरोऽशिक्षिताः विद्याशून्याः कर्तव्यज्ञानहीनाश्च सन्ति, तर्हि पुत्राः पुत्र्यश्च तथैवाविद्याग्रस्ताः कुशलता-रहिताश्च भविष्यन्ति। यदि नार्यः शिक्षिताः सन्ति, तर्हि ताः स्वपुत्राणां पालनं रक्षणं शिक्षणादिकं च सम्यक्तया करिष्यन्ति, एवं तासां सन्ततिः विद्यायुक्ता हृष्टा पुष्टा सद्गुणोपेता च भविष्यति। अत एव महानिर्वाणतन्त्रेऽप्युक्तमस्ति—

कन्याऽप्येवं लालनीया शिक्षणीया प्रयत्नतः ॥१॥

विवाहे संजाते कन्याः गृहस्थाश्रमं प्रविशन्ति। यदि पुरुषो विद्वान् स्त्री च विद्या-शून्या भवति तर्हि तयोः दाम्पत्यजीवनं सुखकरं न भवति। विद्याया अभावात् स्त्री स्वकीयं कर्तव्यं न जानाति, अत एव बहवो रोगा व्याधयश्च तत्र स्थानं कुर्वन्ति। अतः स्त्रीणामपि शिक्षा पुत्राणां शिक्षावदेव आवश्यकी वर्तते। स्त्रियो मातृशक्तेः प्रतीकभूताः सन्ति, अतस्तासां सदा सम्मानः करणीयः। यस्मिन् देशे समाजे च स्त्रीणामादरो भवति, स देशः समाजश्चोन्नतिं प्राप्नुतः। उक्तं च मनुना—

'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' ॥२॥

बालिकानां शिक्षा बालकैः सहैव स्यात्, पृथग् वा, इत्येष विषयः साम्प्रतं यावद् विवादास्पदमेवास्ति। स्त्रीशिक्षाया भारते प्रथमं बहुविरोधोऽभवत्। साम्प्रतं स समाप्त-प्राय एव। स्त्रीशिक्षायाः काश्चन हानयोऽपि दृश्यन्ते, तासां परिमार्जनं कर्तव्यम्। शिक्षिताः स्त्रियः प्रायोऽधिकं सुकुमार्यो भवन्ति। तासां चेतो गृहकर्मसम्पादने न तथा संलग्नं भवति यथा विलासे आमोदे प्रमोदे च रमते। एतास्त्रुटयः परिमार्जनीयाः। स्त्रीणां सा शिक्षाऽद्यत्वे विशेषतो लाभप्रदा विद्यते, यया ताः गृहकर्मप्रवीणाः कुलाङ्गनाः सत्यः पतिव्रताः साध्व्यो विदुष्यो मातरश्च भवन्ति। यथा ता देशस्य समाजस्य च कल्याणसम्पादने प्रवृत्ता भवन्ति, सैव शिक्षा हितकरी वर्तते।

देशस्य समाजस्य चोन्नत्यै श्रीवृद्धये च स्त्रीशिक्षाऽत्यावश्यकी वर्तते।

१५. शठे शाठ्यं समाचरेत् ।

[१. प्रस्तावना, २. शाठ्यस्यावश्यकता, उपयोगिता, लाभाः, हानयश्च, ३. दृष्टान्ताः, ४. उपसंहारः ।] ।

यो जनः परस्यापकारं हानिं वा करोति, शिष्टाचारस्य सदाचारस्य च नियमान् न पालयति, दुर्वृत्तः कुकर्मसु प्रवृत्तश्च भवति, स 'शठ' इत्युच्यते । एतादृशाः पुरुषाः समाजस्य हानिं कुर्वन्ति, देशस्योन्नतिमार्गे बाधामुपस्थापयन्ति, जातेः समाजस्य राष्ट्रस्य चावनतेः कारणं भवन्ति, अत एतादृशानां पुरुषाणां नियन्त्रणं दण्डनं ताडनादिकं चावश्यकमस्ति ।

मनुना मनुस्मृतौ ये महापातकिनः सन्ति, तेषां गणना आततायिषु कृता वर्तते । तेषां वधे न कोऽपि दोषो भवति । आततायिनश्च षड्विधा भवन्ति—गृहादिदाहकः, विषप्रदः, वधकर्ता, धनहर्ता, क्षेत्रहर्ता, स्त्रीहर्ता च ।

अततायिनमायान्तं हन्यादेवाविचारयन् ॥१॥
अग्निदो गरदश्चैव शस्त्रोन्मत्तो धनापहः ।
क्षेत्रदारहरश्चैतान् षड् विद्यादाततायिनः ॥२॥

लोके सदा दृश्यत एतद् ये जना अतीव साधवः सरला भवन्ति, तेषामादरो न भवति । दुष्टास्तेषां धनादिकमपि हरन्ति, कार्यबाधां च कुर्वन्ति । अत एवोच्यते—'मृदुर्हि परिभूयते' । राजनीतौ च विशेषतः शठेषु शठतायाः प्रयोगः करणीयः । अन्यथा कार्यसिद्धिर्न भविष्यति । उक्तं च नैषधचरिते—"आर्जवं हि कुटिलेषु न नीतिः ।" महाकविभारविनाऽपि किरातार्जुनीये एतस्यैव प्रतिपादनं कृतमस्ति ।

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान् निशिता इवेषवः ॥३॥
अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥४॥

इमां नीतिमेव स्वीकृत्य रामः पापिनो रावणस्य वधमकरोत्, पाण्डवाश्च दुर्योधनादीनां कौरवाणाम् । एषा नीतिः शठेष्वेव प्रयोज्या, न तु सज्जनेषु । ये सज्जनाः सन्ति तैः सह सद्भावपूर्वकमेव व्यवहर्तव्यम् । उक्तं च महाभारतेऽपि—

यस्मिन् यथा वर्तते यो मनुष्यस्तस्मिन् तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया वर्तितव्यः साध्वाचारः साधुना प्रत्युपेयः ॥५॥
अन्या चापि सूक्तिरस्ति—पयःपानं भुजंगानां केवलं विषवर्धनम् ॥६॥

अतो मनुष्यैः स्वकल्याणाय शठेषु शठतापूर्ण एव व्यवहारः कार्यः, सज्जनेषु च सज्जनतापूर्णः । एषैव नीतिविदां संमतिरस्ति । उक्तं च कालिदासेन—

शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः ।

१६. मानवजीवनस्योद्देश्यम् ।

[१. प्रस्तावना, २. जीवनोद्देश्यं परोपकरणं समाजसेवादि, ३. उद्देश्याभावे दोषाः, ४. उपसंहारः ।]

विदुषां कथनमस्ति यत् 'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते'। साधारणो जनोऽपि प्रयोजनं विना कस्मिंश्चिदपि कार्ये न प्रवृत्तो भवति । मनुष्यो जन्म धारयति । तस्य जीवनस्य किंचिदुद्देश्यमवश्यमेव भवेत् । संसारे ये उद्देश्यहीना भवन्ति, ते कदापि सफला न भवन्ति ।

जीवनस्य किमुद्देश्यं स्यादिति विचारे प्रथममेतत् समक्षं समायाति यत् जीवनस्योद्देश्यं समुन्नतं स्यात्, येन जीवनस्य सफलता स्यात् । समुन्नतेषु उद्देश्येषु देशसेवायाः समाजसेवायाः परोपकारस्य जातेरुद्धरणस्य विद्योन्नतेश्च भावना सम्मुखमायाति । मनुष्यः सामाजिकः प्राणी वर्तते, अतो यदि समाजः समुन्नतोऽस्ति तर्हि सर्वेऽपि सुखिनो भविष्यन्ति । यदि समाजो न समुन्नतोऽस्ति तर्हि सर्वेऽपि विपत्तिग्रस्ता दीना हीनाश्च भविष्यन्ति । यदि देशः पराधीनोऽस्ति तहि मनुष्येषु स्वाभिमानस्य भावना न भविष्यति । अतो मनुष्यजीवनस्य मुख्यमुद्देश्यं भवति यत् स मानवजीवनस्य साफल्याय परोपकारं कुर्यात्, देशसेवां कुर्यात्, समाजसेवां कुर्यात्, विद्यायाश्चोन्नतिं कुर्यात् । एवंप्रकारेणैव जीवनं सफलं भवति ।

जीवनस्य सफलतायै एतदपि सदा प्रयतनीयं यत् स कदाचिदपि पापं न कुर्यात्, कुत्सितं कर्म न कुर्यात् । पवित्रजीवनस्य यापनेनैव जीवनं सफलं भवति । उक्तं च—

मुहूर्तमपि जीवेत नरः शुक्लेन कर्मणा ।
न कल्पमपि कृष्णेन लोकद्वयविरोधिना ॥१॥

मनुष्यजीवने सदा सर्वैरेव प्रयत्नः करणीयो यत् स महाविद्वान् महापराक्रमी महायशस्वी सच्चरित्रो दानी परोपकारी समाजसेवी लोकहितकारी धर्मात्मा च स्याद्, अन्यथा मनुष्यजीवने पशुजीवने च न कोऽपि भेदोऽस्ति । साधूक्तं च—

यज्जीव्यते क्षणमपि प्रथितं मनुष्यैर्विज्ञानविक्रमयशोभिरभज्यमानम् ।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः, काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ॥२॥

यो नात्मजे न च गुरौ न च भृत्यवर्गे, दीने दयां न कुरुते न च बन्धुवर्गे ।
किं तस्य जीवितफलन मनुष्यलोके, काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ॥३॥

मनुष्यो जीवननिर्वाहाय यां कामपि आजीविकां ग्रहीतुं शक्नोति, पठनं पाठनं कृषिं वाणिज्यं सेवाकर्म समाजसेवादिकं वा ! परन्तु स सदा जीवनसाफल्याय सत्कर्म अवश्यं कुर्यात् । निरुद्देश्यं जीवनं विनश्यति । अतः कदाचिदपि उद्देश्यत्यागो न विधेयः । मनुष्यस्य सदुद्योगेन सदुद्देश्यमपि अवश्यं पूर्णं भवति ।

१७. आचार्यदेवो भव।

[१. प्रस्तावना, २. गुरुभक्तेरुपयोगिता लाभाश्च, ३. तदभावे दोषाः, ४. दृष्टान्ताः, ५. उपसंहारः।]

भारतीयशास्त्रेषु गुरोर्माहात्म्यं बहु गीतमस्ति। स ईश्वरस्य प्रतिमूर्तिरिति मन्यते। अत एवोच्यते—'आचार्यदेवो भव' इति। आचार्यो देवतावत् पूज्यो मान्यश्च। यः शिष्येभ्यो विद्यां ददाति, कर्तव्याकर्तव्यं च बोधयति, सदाचारस्य संयमस्य त्यागस्य तपसश्च शिक्षां ददाति, स आचार्यो गुरुर्वा भवति।

गुरोर्माहात्म्यमेतस्माद् ज्ञायते यद् बालको यदा गुरोः समीपं शिक्षार्थं याति, यज्ञोपवीतं च धारयति, शिक्षां च प्राप्नोति, तदैव स द्विजो द्विजन्मा द्विजातिर्वा भवति। अन्यथा स शूद्र एव भवति। माता पिता च बालकस्य शरीरमेव सृजतः, गुरुस्तु तं विद्यया शिक्षया दीक्षया कर्तव्योद्बोधनेन च मनुष्य करोति। अतो मातुः पितुश्च गुरुः गरीयान् भवति। उक्तं च महाभारते—

शरीरमेव सृजतः पिता माता च भारत।
आचार्यशिष्टा जातिः सा दिव्या सा चाऽजराऽमरा ॥१॥
गुरुर्गरीयान् पितृतो मातृतश्चेति मे मतिः ॥२॥

गुरुः भक्त्या सेवया शुश्रूषया च तुष्यति, आज्ञापालनेन तत्कथनानुरूपव्यवहारेण च स प्रीतो भवति। गुरुः यदा प्रीतो भवति, स यत् किंचिदपि जानाति, तत्सर्वं स्वशिष्याय समर्पयितुमिच्छति। अतो विद्याप्राप्त्यै गुरुभक्तेः महती आवश्यकता वर्तते। सत्यमेतदुक्तं च—

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा।
अथवा विद्यया विद्या चतुर्थान्नोपलभ्यते ॥३॥

न केवलमेतदेव, अपि तु गुरुभक्त्या मनुष्यस्य चतुर्मुखी उन्नतिर्भवति। उक्तं च—

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥४॥

गुरुभक्त्यैव आरुणिः ब्रह्मज्ञः संजातः, एकलव्यश्च महाधनुर्धरो जातः। गुरुशुश्रूषया गुरुभक्त्यैव च कालिदासादयो महाकवयो जाताः, अन्ये च केचन ऋषयो महर्षयः सिद्धाः कलाविदो विविधशास्त्रविशारदाश्च समभवन्। एष गुरुभक्तेरेव महिमा। ये गुरुभक्तिं न कुर्वन्ति, न वा जानन्ति, तेषां विद्या न प्रकाशते, तेषां यशो न वर्धते, तेषां तेजः क्षीयते, शरीरमायुश्चापि क्षयमुपेतः। ये गुरुभक्ता भवन्ति तेषां विद्या सदा प्रकाशते, तेषां यशश्च प्रथते, तेषां तेजो विराजते, शरीरमायुश्चापि वृद्धिमेतः। अतः सर्वे सर्वदा गुरवः पूज्या मान्याश्च।

१८. मम महाविद्यालयः ।

[१. प्रस्तावना, २. विद्यालयस्य शिक्षा, छात्राणां गुरूणां च संख्यादिकम्, विशेषताश्च, ३. उपसंहारः ।]

मम महाविद्यालयो नगराद् बहिः एकान्ते सुन्दरे प्रदेशे स्थितोऽस्ति । महाविद्यालयस्य भवनं निरीक्ष्य चेतो नितान्तं हर्षमनुभवति । महाविद्यालयस्य रमणीयता च न कस्य चेतो बलाद् हरति ? महाविद्यालयोऽस्माकं कृते न केवलं पाठशालाऽस्ति, अपि तु अस्माकं सर्वस्वमस्ति । अस्माभिरत्रैव अध्ययनं क्रियते, सदाचारस्य पाठः पठ्यते, विनयस्य अनुशासनस्य च शिक्षणं गृह्यते, समाजसेवाया देशभक्तेश्च भावनाऽत्रैव प्राप्यते। किमन्यत्, जीवनस्य यत् कर्तव्यमस्ति, तत् सर्वमपि अत्रैव लभ्यते । अत एव महाविद्यालयोऽयम् अस्माकं कृते 'विद्यामन्दिरम्' अस्ति ।

मम महाविद्यालयेऽध्यापकानां प्राध्यापकानां च संख्या पञ्चाशतोऽधिका वर्तते । छात्राणां च संख्या सहस्रादधिका विद्यते । प्रायः शतद्वयी बालिकानामपि वर्तते । महाविद्यालयस्य आचार्यवर्या अतीव प्रखरा विविधविद्यापारंगता विद्वांसः सन्ति । तेषां तेजोमयं वदनं वीक्ष्य छात्राः श्रद्धावनता भक्तिभावोपेताश्च भवन्ति । अध्यापकेषु च बहवो महाविद्वांसः सन्ति । सर्वेऽपि स्वस्वविषयेऽतीव विशारदाः सन्ति । तेषां शिक्षापद्धतिरपि बहु मनोरमा वर्तते । छात्रा अपि प्रायो व्युत्पन्नबुद्धयः सन्ति । शिक्षायाः समीचीनत्वादेव अन्यप्रान्तेभ्योऽपि छात्रा अत्रैवाध्ययनार्थमागच्छन्ति । राजकीयपरीक्षासु च विशिष्टं स्थानम् अस्मद्विद्यालयीयाः छात्रा लभन्ते । न केवलं पठने एव छात्रा योग्यतमाः सन्ति, अपि तु क्रीडने तरणे धावने वाक्प्रतियोगितासु अनुशासने संयमे समाजसेवायां देशसेवायामपि च तेषां स्थानं सर्वप्रथममेव विद्यते । अस्माकं महाविद्यालये विद्यार्थिनां क्रीडनार्थं क्रीडाक्षेत्रं सुविस्तृतमस्ति । विविधभाषासु भाषणपाटवार्थं विविधाः परिषदः सन्ति । सैनिकशिक्षाया अपि प्रबन्धोऽस्ति । ये क्रीडनादिषु प्रथमस्थानं लभन्ते, ते पुरस्कारादिकमपि लभन्ते । ये किमपि शोभनं कर्म कुर्वन्ति, ते सदा पुरस्कृता भवन्ति, विद्यालये संमानमादरं च लभन्ते । छात्राणां स्वास्थ्यवृद्धयर्थं व्यायामस्य, मल्लयुद्धस्य, अन्येषां चोपयोगिवस्तूनां प्रबन्धोऽस्ति, अत एव छात्रा हृष्टाः पुष्टाश्च सन्ति । छात्राणां स्वास्थ्यं निरीक्ष्य सर्वेषामपि जनानां चेतः प्रहर्षमाप्नोति ।

साम्प्रतमस्माकमेतत् कर्तव्यं भवति यत् सर्वथा वयं महाविद्यालयस्य कीर्तिं दिक्षु विस्तृतां कुर्याम । एवमस्माकमपि यशो वृद्धिं प्राप्स्यति ।

१९. सर्वे गुणाः काञ्चनमाश्रयन्ति। (धनोपार्जनम्)

[१. प्रस्तावना, २. धनस्योपयोगिता, लाभाश्च, ३. निर्धनताया हानयः; ४. उपसंहारः।]

सर्वे जनाः संसारे सुखमिच्छन्ति। सुखं च धनेनैव प्राप्तुं शक्यते। अतो धनोपार्जनस्य महत्यावश्यकता भवति। अद्यत्वे यत्र कुत्रचिदपि गच्छामस्तत्र सर्वत्रैव धनस्य माहात्म्यं पश्यामः। धनेन विना न विद्योपार्जनं कर्तुं शक्यते, न जीविकानिर्वाहश्च भवति। सुखार्थं परोपकारार्थं त्यागार्थं दानार्थं भोगार्थं विवाहार्थं पुत्रादिसंरक्षणार्थं गार्हस्थ्य-संचालनार्थं भोजनार्थं भवननिर्माणार्थं सर्वत्रैव धनस्यावश्यकता भवति। यस्य समीपे धनं नास्ति तस्य कश्चिदपि अभिलाषो न पूर्तिमेति। साधूक्तं केनापि कविना—

बुभुक्षितैर्व्याकरणं न भुज्यते, पिपासितैः काव्यरसो न पीयते।
न छन्दसा केनचिदुद्धृतं कुलं, हिरण्यमेवार्जय निष्फला गुणाः ॥१॥

वेदेऽपि धनोपार्जनस्य धनस्वामित्वस्य च आदेशः प्राप्यते—

वयं स्याम पतयो रयीणाम् ॥२॥

यस्य समीपे धनं भवति स एव सुखेन शेते। स एव संसारे कुलीनो विद्वान् गुणज्ञो दानी वक्ता प्रभुः इति कथ्यते। अत एवोच्यते—

यस्यास्ति वित्तं स नरः कुलीनः, स पण्डितः स श्रुतवान् गुणज्ञः।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ॥३॥

धनैर्निष्कुलीनाः कुलीना भवन्ति, धनैरापदं मानवा निस्तरन्ति।
धनेभ्यः परो बान्धवो नास्ति लोके, धनान्यर्जयध्वं धनान्यर्जयध्वम् ॥४॥

यस्य समीपे धनं भवति, तस्यैव मित्राण्यपि भवन्ति, न तु निर्धनस्य। यतो हि—

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ॥५॥

प्राचीनैः मुनिभिरपि धनस्योपयोगिता स्वीकृता आसीत्। अत एव तैः धर्मार्थकाम-मोक्षात्मके चतुर्वर्गे अर्थस्य धर्मानन्तरं स्थानं कृतमस्ति।

धनोपार्जनस्य बहूनि साधनानि सन्ति सदोषाणि निर्दोषाणि च चौर्येण, कपटेन, छलप्रपञ्चेन, मिथ्याभाषणेन, उत्कोचग्रहणेन, अन्यैश्चानुचितसाधनैर्धनं प्राप्तुं शक्यते, परन्तु तद्धनं विनाशकरमेव भविष्यति। अतः सर्वैः सर्वदा सदुपायैरेव धनोपार्जनं कर्तव्यम्। विद्याध्यापनेन, कृषिकर्मणा, व्यापारेण, सेवया, परिश्रमेण वा यद् धनमुपार्जितं भवति, तत् फलति। तेनैव मनुष्यस्य श्रीवृद्धिर्भवति। अतः सर्वैः सदुपायैरेव सदा धनोपार्जनं कर्तव्यम्, सत्कर्मसु च तस्य व्ययः करणीयः।

२०. सन्तोष एव पुरुषस्य परं निधानम्।

[१. प्रस्तावना, २. सन्तोषस्योपयोगिता लाभाश्च, ३. असन्तोषेण हानयः, ४. उपसंहारः।]

संसारे सर्वे जनाः सुखमिच्छन्ति। सुखं शान्तिश्च तदैव भवतो यदा मनुष्यः सन्तुष्टो भवति। यत् किंचित् स्वकीयेन परिश्रमेण प्रयत्नेन च प्राप्नोति, तत्रैव सुखानुभूतिकरणं सन्तोष इत्युच्यते। ये जनाः सन्तोषहीना भवन्ति, ते धनलाभेऽपि पर्याप्तसुखसामग्री-सत्त्वेऽपि असन्तुष्टा सन्तोऽन्यदपि धनं प्राप्तुमिच्छन्तो भ्रमन्ति। एवं तेषां जीवनं दुःखमयम् अशान्तियुक्तं च भवति।

जीवने सुखशान्तिलाभाय सन्तोषस्य महत्यावश्यकता वर्तते। सन्तोषस्य सद्भावादेव ऋषयो मुनयो महर्षयश्च जगद्वन्द्या भवन्ति। सन्तोष एव सुखमस्ति, न चासन्तोषे। असन्तुष्टा मृगतृष्णिकामिव मायामनुसरन्तः सदा दुःखिता भवन्ति। उक्तं च—

सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम्।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥१॥

महाभारते भगवता व्यासेनापि सन्तोषस्य महत्त्वं प्रतिपादयतोक्तमस्ति—

अन्तो नास्ति पिपासायाः सन्तोषः परमं सुखम् ॥२॥

ये एवं विचारयन्ति यद् यदि वयं सन्तोषमाश्रयिष्यामस्तर्हि अस्माकमुन्नतिर्न भविष्यतीति ते वस्तुतो मूर्खा एव सन्ति। सन्तोषोऽपि महती श्रीरस्ति। तथा हि—

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते, शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति।
कन्दैः फलैर्मुनिवराः क्षपयन्ति कालं, सन्तोष एव पुरुषस्य परं निधानम् ॥३॥

ये सन्तोषयुक्ता भवन्ति तेषां कृते जगदेतत् सुखमयं भवति। यतो हि—

वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या, सममिह परितोषो निर्विशेषो विशेषः।
स हि भवति दरिद्रो यस्य तृष्णा विशाला, मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥४॥

अपि च— अकिंचनस्य दान्तस्य शान्तस्य समचेतसः।
सदा सन्तुष्टमनसः सर्वाः सुखमया दिशः ॥५॥

केचन सन्तोषस्य इममर्थं गृह्णन्ति यद् मनुष्यः सर्वं कर्म त्यजेत्, तेऽपि अतत्त्वज्ञाः सन्ति। सन्तोषस्य केवलमयं भावोऽस्ति यद् यत्किंचित् श्रमेण प्राप्नुयात्, तत्रैव सन्तोषं कुर्यात्। अनुचितैः प्रकारैः धनस्योपार्जने यत्नं न कुर्यात्। धनस्य कृते वा स्वकीयं स्वास्थ्यं न विनाशयेत्, सर्वेषामप्रियो न स्यात्। धनं सुखार्थं शान्त्यर्थं चास्ति, धनं चास्माकं कृते वर्तते, न तु वयं धनार्थं सः। अतस्तावदेव धनं हितकरं वर्तते, यतः स्वास्थ्यमपि सुरक्षितं भवति, सुखं शान्तिं च प्राप्नोति। अतः सर्वैरपि सुखशान्तिप्राप्त्यै सन्तोष उपादेयः।

(९) अनुवादार्थ गद्य-संग्रह

(१) संस्कृत-भाषा

शुद्ध और परिष्कृत भाषा को संस्कृत कहते हैं। इसी के नाम देवभाषा, देववाणी, गीर्वाणवाणी आदि हैं। यह भारत की एक अमूल्य और अनुपम निधि है। भारतवर्ष का समस्त प्राचीन ज्ञान-भण्डार इसी भाषा में सुरक्षित है। वेद, उपनिषद्, दर्शन, रामायण, महाभारत, गीता आदि ग्रन्थ इसी भाषा में हैं। **कुछ विद्वानों को** यह भ्रम है कि संस्कृत भाषा केवल ग्रन्थों की ही भाषा थी और इसका केवल पठन-पाठन में ही उपयोग होता था। जिस प्रकार आज-कल खड़ी बोली नामक साहित्यिक हिन्दी शिष्ट-समाज के व्यवहार और उपयोग की भाषा है, उसी प्रकार प्राचीन समय में संस्कृत-भाषा शिष्ट-वर्ग के दैनिक व्यवहार की भाषा थी। यास्क के निरुक्त, पाणिनि की अष्टाध्यायी और पतञ्जलि के महाभाष्य के अध्ययन से यह पूर्णतया स्पष्ट होता है कि उनके समय में संस्कृत दैनिक व्यवहार की भाषा थी। यास्क और पाणिनि ने वेदों की भाषा से **इसको पृथक् करते हुए** इसको 'भाषा' अर्थात् दैनिक व्यवहार की भाषा कहा है। जिस प्रकार आजकल जन-साधारण में प्रचलित भाषा साहित्यिक हिन्दी से भिन्न है, उसी प्रकार प्राचीन समय में जन-साधारण में व्यवहृत भाषा को प्राकृत कहते थे।

(२) रामायण

रामायण संस्कृत-साहित्य का उच्च कोटि का महाकाव्य है। इसके रचयिता महर्षि वाल्मीकि हैं। इसमें मर्यादापुरुषोत्तम राम के जीवन-चरित्र का वर्णन है। यह संस्कृत में सर्व-प्रथम लौकिक भावों से युक्त काव्य-ग्रन्थ है, अतः इसको आदि-काव्य कहा जाता है। इसमें भारतीय संस्कृति का सुन्दरतम रूप वर्णित है। काव्य की दृष्टि से यह बहुत सुन्दर काव्य है। इसकी भाषा प्रारम्भ से अन्त तक परिष्कृत और प्रसाद-गुण-युक्त है। इसमें भाव बहुत उच्च और मनोरम हैं। कविता **सरल, सरस और मनोहर है**। अलंकारों का सुन्दर सम्मिश्रण हुआ है और रसों का परिपाक भी उत्तम हुआ है। इसमें करुणरस प्रधान है। यह हिन्दुओं का आचारशास्त्र है। इसकी शिक्षाएँ व्यावहारिक हैं। **परकालीन** कवियों और नाटककारों पर इसका बहुत गम्भीर प्रभाव पड़ा है। उन्होंने इससे भाव लिये हैं। इस पर आश्रित बहुत से काव्य और नाटक हैं। संसार की बहुत-सी भाषाओं में इसका अनुवाद हो चुका है। वाल्मीकि की कीर्ति आज भी अजर और अमर है।

संकेत—(१) केषाञ्चिद् विदुषाम्। अद्यत्वे। इमां पृथक् कुर्वन्तौ। उक्तवन्तौ। (२) सरला, सरसा, मनोहरा च। परकालिकेषु।

(३) भास

आजतक जो साहित्य उपलब्ध हुआ है, उसकी दृष्टि से भास को सर्वप्रथम नाटककार **कहा जा सकता है।** उसने १३ नाटक लिखे हैं। ये नाटक विभिन्न विषयों पर हैं। इससे ज्ञात होता है कि वह एक सफल और कुशल नाटककार था। उसके नाटकों में जो विशेषताएँ विशेष रूप से दृष्टिगोचर होती हैं, वे हैं—भाषा की सरलता, अकृत्रिम शैली, वर्णनों में यथार्थता, नाटकीय पात्रों के चरित्र-चित्रण में वैयक्तिकता और नाटकीय गुण-प्रवाह, सजीवता और शक्तिमत्ता की सत्ता। उसके नाटक अत्यन्त रोचक और रंगमंच की दृष्टि से विशेष सफल हुए हैं। उसके नाटकों में मौलिकता और कल्पना-वैचित्र्य विशेष रूप से **प्राप्त होता है।** संस्कृत में सर्वप्रथम एकांकी नाटक लिखने का **श्रेय** भास को है। उसने ५ **एकांकी नाटक** लिखे हैं। उसकी शैली में **माधुर्य, ओज** और **प्रसाद** ये तीनों गुण हैं। उसकी भाषा में सरसता, सरलता, सुबोधता, स्वाभाविकता और प्रवाह है। वह मनोवैज्ञानिक विवेचन से बहुत दक्ष है। वह भारतीय भावों का कवि है।

(४) कालिदास

महाकवि कालिदास संस्कृत के सर्वश्रेष्ठ कवि हैं। वे नाटककार, महाकाव्य-निर्माता और गीतिकाव्य-कर्ता थे। उनके प्रमुख ग्रन्थ ये हैं—(क) नाटक—मालविकाग्निमित्र, विक्रमोर्वशीय, अभिज्ञानशाकुन्तल। (ख) महाकाव्य—कुमारसंभव, रघुवंश। (ग) गीतिकाव्य—ऋतुसंहार, मेघदूत। वे वैदर्भी **रीति के** सर्वोत्तम कवि थे। उनकी प्रतिभा **सर्वतोमुखी** थी। उनकी कृतियों में प्रसाद और माधुर्य गुणों का अपूर्व सम्मिश्रण है। उनमें कृत्रिमता और क्लिष्टता का अभाव है। उनके काव्यों में उच्चकोटि की व्यंजकता है। रसों का परिपाक भी उत्तम रूप से हुआ है। वे नीरस कथानक को भी सरस और मनोरम **बना देते हैं।** उनकी लोकप्रियता का कारण उनकी प्रसाद-गुण-युक्त ललित और परिष्कृत शैली है। उनके काव्यों में **शब्द-लाघव** उनकी **कलात्मक रुचि का** परिचायक है। वे चरित्र-चित्रण में असाधारण पटु हैं। उनकी भाषा और भाव पात्रों के अनुकूल हैं। वे उपमाओं के लिए बहुत प्रसिद्ध हैं। उनका **मत** है कि तपस्या से प्रेम निर्मल और पुष्ट होता है। परकालीन **कवियों के लिए** उनके ग्रन्थ **आदर्श रहे हैं।**

संकेत—(३) अद्यावधि। वक्तुं शक्यते। प्राप्यते। श्रेयः। एकाङ्कीनि नाटकानि। माधुर्यम्। ओजः। प्रसादः (४) रीत्याः। विदधाति। शब्दलाघवम्। कलात्मिकया रुचेः। मतम्। कवीनां कृते। आदर्शरूपा अभवन्।

(५) बाण भट्ट

संस्कृत-साहित्य में गद्य-लेखकों में महाकवि बाणभट्ट का स्थान सर्वोत्कृष्ट है। उन्होंने दो गद्य-ग्रन्थ लिखे हैं—हर्षचरित और कादम्बरी। ये दोनों ही ग्रन्थ गद्य की दृष्टि से अनुपम हैं। हर्षचरित में कुछ क्लिष्टता दृष्टिगोचर होती है। कवि की प्रतिभा का चरम उत्कर्ष कादम्बरी में दिखाई देता है। उनकी शैली में शब्द और अर्थ, भाव और भाषा का सुन्दर समन्वय है। उन्होंने विषय के अनुकूल शब्दावली का ही प्रयोग किया है। अलंकारों का भी उचित रूप से समावेश किया है। उनका प्रकृति-चित्रण विशद, सजीव और अलंकृत होता है। प्रकृति-वर्णनों में उन्होंने अपनी सूक्ष्म-निरीक्षण शक्ति का परिचय दिया है। वे पांचाली रीति के कवि हैं। प्रसंग के अनुसार कहीं लम्बे समासयुक्त पद देते हैं और कहीं बहुत छोटे-छोटे वाक्य। उनके वर्णन सर्वाङ्गीण और पूर्ण होते हैं। उनका भाषा और शब्दकोष पर असाधारण अधिकार था।

(६) ग्राम्य-जीवन

भारतवर्ष ग्राम-प्रधान देश है। अधिक जनता गाँवों में ही रहती है। ग्राम-निवासियों को ग्रामीण कहा जाता है। इनका जीवन बहुत सरल और निष्कपट होता है। इनकी वेशभूषा भी साधारण होती है। इनका लक्ष्य होता है—सादा जीवन और उच्च विचार। ये बहुत परिश्रमी होते हैं। इनके कठोर परिश्रम का ही फल है कि हमें अनायास अन्नादि प्राप्त होते हैं। ग्रामों की जलवायु स्वास्थ्य के लिए बहुत लाभप्रद होती है। अतएव ग्रामीण जन स्वस्थ और हृष्ट-पुष्ट होते हैं।

(७) शिष्टाचार

शिष्टों अर्थात् सज्जनों के आचार को शिष्टाचार कहते हैं। सज्जन पुरुष सदा दूसरों का उपकार करते हैं। अपने से बड़ों का आदर और सम्मान करते हैं। दूसरों के दुःख में दुःखी होते हैं। अपने स्वार्थ की सिद्धि के लिए दूसरों को हानि नहीं पहुँचाते। मधुर वचन बोलते हैं। प्रत्येक मनुष्य को शिष्टाचार का पालन करना चाहिए। उसका कर्तव्य है कि वह बड़ों की आज्ञा का पालन करे, उनका आदर करे। अपने संबन्धियों से प्रेम करे। असत्य न बोले। निरर्थक विवाद न करे। सबसे स्नेह का व्यवहार करे।

संकेत :—(५) दृश्यते। दीर्घसमासयुक्तानि पदानि प्रयुङ्क्ते। लघूनि। (६) कथ्यन्ते। सरलम्। वयं ̈ ̈प्राप्नुमः। (७) उपकुर्वन्ति। ज्येष्ठानाम्। परेषां न अपकुर्वन्ति। शिष्टाचारः पालनीयः। ज्येष्ठानाम्। स्वसम्बन्धिषु। सर्वेषु स्नेहेन व्यवहरेत्।

(८) महर्षि दयानन्द

महर्षि दयानन्द का जन्म १८२४ ई० में गुजरात प्रान्त के टंकारा नगर में हुआ था। इनके पिता श्री करसनजी तिवारी शिवभक्त ब्राह्मण थे। अपने चाचा और बहिन की मृत्यु को देखकर इनके हृदय में वैराग्य उत्पन्न हुआ। ये सत्यं शिवं को ढूँढ़ने के लिए घर से निकल पड़े। इन्होंने वेदोक्त परम्परा की प्रतिष्ठा के लिए आर्यसमाज की स्थापना की। वेदों का भाष्य करके वेदों का महत्त्व प्रदर्शित किया। इन्होंने समाज-सुधार के अनेक कार्य किये हैं। जैसे—अस्पृश्यों का उद्धार, स्त्री-शिक्षा का प्रचार, गोशाला और अनाथालयों की स्थापना, गोरक्षा आदि कार्य। ये पूर्ण ब्रह्मचारी, त्यागी, तपस्वी, देशभक्त, समाज-सुधारक, वेदों में अद्वितीय विद्वान्, असाधारण वक्ता और निर्भीक संन्यासी थे।

(९) महात्मा गांधी

महात्मा गांधी का जन्म २ अक्टूबर, १८६९ ई० को काठियावाड़ के पोरबन्दर स्थान में हुआ था। आपके पिता कर्मचन्द गांधी और माता पुतलीबाई थीं। ये दोनों बहुत सज्जन प्रकृति के थे। गांधीजी भी बचपन से ही अत्यन्त साधु स्वभाव के थे। भारतवर्ष और विदेश में शिक्षा प्राप्त करके ये देश-सेवा के कार्य में लग गये। इन्होंने भारतवर्ष को स्वतन्त्र करने का प्रण किया। इनके ही भगीरथ प्रयत्न से भारतवर्ष स्वतन्त्र हुआ है। अतएव इनको 'राष्ट्रपिता' कहा जाता है। ये सत्य और अहिंसा की साक्षात् मूर्ति थे। इन्होंने हरिजनोद्धार, स्त्री-शिक्षा, भारतीय कला-कौशल की उन्नति आदि अनेक प्रशंसनीय कार्य किये हैं। भारतवर्ष सदा इनका ऋणी रहेगा।

(१०) श्री जवाहरलाल नेहरू

श्री नेहरूजी का जन्म १४ नवम्बर, १८८९ ई० को पवित्र प्रयाग नगर में हुआ। इनके पिता श्री मोतीलाल नेहरू और माता स्वरूपरानी थीं। इनकी अधिकांश शिक्षा विदेश में हुई थी। महात्मा गांधी के सम्पर्क में आकर ये देश-सेवा में लग गये। उस समय से लेकर मृत्यु तक देश-सेवा में ही लगे रहे। इनमें असाधारण प्रतिभा और कार्य-शक्ति थी। इनके त्याग, तपस्या और देश-सेवा से भारतीय इन पर इतने मुग्ध थे कि ये जहाँ भी जाते थे, वहाँ लाखों की भीड़ एकत्र हो जाती थी। ये चार बार कांग्रेस के अध्यक्ष रहे थे। इनकी कीर्ति देश और विदेश में सर्वत्र व्याप्त थी। ये भारत के प्रधान मन्त्री थे।

संकेत :—(८) पितृव्यस्य। उदभवत्। अन्वेष्टुम्। निरगच्छत्। अस्थापयत्। प्रादर्शयत्। (९) सरलस्वभावौ। उच्यते। भविष्यति। (१०) संपर्कं प्राप्य। संलग्नः। तदाप्रभृति निधनं यावत्। लक्षशो नराणां समवायः।

(११) श्रावणी पर्व

